Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. २६०- घ

Title कथासरितसागर

Author भट्ट सोमदेव:

Extent २१ Age १८४४

Subject आख्यायिका काव्यम्

© Dharmartha Trust J&K. Digitized by eGangotri

भाग (१) २१ पत्र

© Dharmartha Trust J&K. Digitized by eGangotri

पाठकोपाहूवैद्यनाथशर्मणः

१५७

नं. २९०

© Dharmartha Trust J&K. Digitized by eGangotri

क॰सा॰

१

श्रीगणेशायनमः॥ ॐनमोभगवत्यैशारदायैनमः नमःशिवायसशिवायनमः कमलदलविपुलनयनाभिरामायश्रीनारायणाय श्रियंदिशतुनःशंभोः

ःश्यामःकंठोमनोभुवाअंकस्थपार्वतीदृष्टिपाशैरिवविवेष्टितः संध्यानृत्योत्सवेताराःकरेणोद्धूयविघ्नजित् सीत्कारशीकरैरन्याःकल्पयन्निवपातुवः

प्रणम्यवाचंनिःशेषपदार्थोद्योतदीपिकां बृहत्कथायाःसारस्यसंग्रहंरचयाम्यहम् आद्यमत्रकथापीठंकथामुखमतःपरं ततोलावाणकोनामतृतीयो

लंबकोभवेत् नरवाहनदत्तस्यजननञ्चततःपरं स्याच्चतुर्दारिकाख्यश्चततोमदनमंचुका ततोरत्नप्रभानामलंबकःसप्तमोभवेत् ततःसूर्यप्रभानामलं

बकस्स्यादष्टमोभवेत् अलंकारवतीचाथततः शक्तियशाभवेत् वेलालंबकसंज्ञश्चभवेदेकादशस्ततः शशांकवत्यपितत स्ततश्चमदिरावती महा

भिषेकानुगतस्ततःस्यात्पंचलंबकः ततःसुरतमंजर्यप्यथपद्मावतीभवेत् ततोविषमशीलाख्योलंबकोष्टादशोभवेत् यथामूलंतथैवैतन्नमनाग

प्यतिक्रमः ग्रंथविस्तरसंक्षेपमात्रंभाषाचभिद्यते औचित्यान्वयरक्षाचयथाशक्तिविधीयते कथारसाविघातेनकाव्यांशस्यचयोजनात् वैदग्ध्य

ख्यातिलाभायममनैवायमुद्यतः किंतुनानाकथाजालस्मृतिसौकर्यसिद्धये ॐ योह्याजः अस्तिकिन्नरगंधर्वविद्याधरनिषेवितः चक्रवर्तीगिरींद्राणां

हिमवानितिविश्रुतःमाहात्म्यमियंतीभूमिमारूढंयस्यभूभृतः यद्भवानीसुताभावंत्रिजगज्जननीगता उत्तरंशिखरंतस्यकैलासाख्योमहागिरिः यो

जनानांसहस्राणिवहन्नाक्रम्यतिष्ठति मंदरोमथिताप्यब्धेर्नसुधासितोगतः अहमेवपदादितियोहसतीवमरीचिभिः वेदावासगृहस्तत्रनिवसत्संवि

कासरवःगणैर्विद्याधरैःसिद्धैःसेव्यमानोमहेश्वरः पिंगोत्तुंगजटाजूटगतोयस्यांकतेनवः संध्यापिशंगपूर्वाद्रिशृंगाग्रसंगसुरवशशी येनांधकासुरपत राम॰

रेकस्यार्पयताहृदि शूलंत्रिजगतोप्यस्यहृदयाच्छिन्नमुद्धृतम् चूडामणिषुयस्यासन्नरवानरप्रतिमाकिंताः प्रमादप्रासचंद्रार्धदर्शनांतिसुरासुराः तंकदाचि १

© Dharmartha Trust J&K. Digitized by eGangotri

त्वमुसन्नविस्रंभा रहसि प्रिया स्तुतिभिस्तोषयामास भवानीपतिमीश्वरम् अस्याः स्तुतिपरो हृष्टस्तामंकमधिरोप्य सः किं ते प्रियं करोमीति बभाषे शशिशे
खरः ततः प्रोवाच गिरिजा प्रसन्नोसि यदि प्रभो रम्यां कांचित्कथां ब्रूहि देवात्र वनवासमम भूतं भव्यं भविष्यद्वा किं तस्याज्जगति प्रिये भवेत्तीत्रजानीयादि
ति शर्वोप्युवाच तां ततः सावज्ञभातस्य निर्बंधके मेरोस्य भोः क्षिपद्मपाणयहे त्वर्थयतो मानवती मनः ततस्त्वज्ञातदुर्बुध्यैव तत्स्वभावनिबंधनात् तस्याः स्वस्यां
कथामेवं शिवः संप्रत्यवर्णयत् आसीत्स्वामी त्रिजगत्पूर्वं ब्रह्मनारायणस्तया महीं भ्रमंतो हिमवत्पादमूलमवापतुः ततो ददृशतुस्तत्र ज्वालालिंगमहत्सु
रा तस्यांतमीक्षितुं प्रायादेक ऊर्ध्वमधोपरः अलब्धांतौ तमोभिमानौ तोषयामासतुश्च तौ आविर्भूय मया चोक्तौ वरः कोप्यर्थ्यतामिति जगदे वेधा अब्रवी
द्भूत्वा पुत्रो मे त्वं भवानिति अथ ज्यस्तेन जातो मानवसारो रोहेगानिक्षितः ततो नारायणो देवः स वरं मामयाचत भूयासं तव शुश्रूषापरोहं भगवन्निति
ततः शरीरभूतोसौ मम जातस्त्वदात्मना यो हि नारायणः सा त्वं शक्तिः शक्तिमतो मम किं च मे पूर्वजाया त्वमित्युक्तवति शंकरे कथं ते पूर्वजायाहमिति व
क्ति स्म पार्वती प्रत्युवाच ततो भर्गः पुरा दक्षप्रजापतेः दुहितृत्वं च तया मां स्वयमेवाज्ञापं तत्कस्मकाः यज्ञे कृशविदादृतास्तेन जामातरोऽखिलाः वर्जितस्त्वहमे
वैकस्ततोऽपृष्ठा नमस्त्वया किं न भर्ता मम मानीतस्त्वयातातेत्यतामिति कपालमाली भर्ता ते कथमाहूयते मखे इत्युवाच गिरं सोथ त्वत्कर्णविषम् विका
म् पापोयमस्मात्तातेन किं देहेन ममामुना इति कोपाद्यस्मत्कं शरीरं तत्क्षिपेत्त्वया मखदक्षमखस्तेन मन्युना नाशि मया ततो जाता हिमाद्रेस्त्वमत्रैश्व
द्रूकलापया अथ स्मरन्नुषारादितपोर्थमहमागमम् पितरं त्वां च नियुंक्ते स्म शुश्रूषायै मम तिथेः तारकांतकमन्युत्रप्राप्तये प्रहितः सुरैः लब्धावकाशोर्वि
ध्यन्मां तत्र दाधो मनोभवः ततस्तीव्रेण तपसा क्रीतोहं वारयात्वया ततश्चतत्त्वं च याप प्रपासोढं तव प्रिये इत्थं मे पूर्वजाया त्वं किमन्यत्कथ्यते तवेति इत्युक्त्वा

© Dharmartha Trust J&K. Digitized by eGangotri

क॰स॰२ विरते शंभौ देवी कोपाकुलाब्रवीत् धूर्त्तस्त्वं न कथां हृद्यां कथयस्यर्थितोपि सन् गंगां वहन्नमेत्संध्यां विदितोसि न किं मम तच्छ्रुत्वा प्रतिपेदेस्या विहितानुन
२ योहरः कथां कथयितुं दिव्यां ततः कोपं मुमोच सा नेह केश्चित्प्रवेष्टव्य इत्युक्तेन तया स्वयम् निरुद्धे नंदिना द्वारे हरो वक्तुं प्रचक्रमे एकान्तसुखिनो देवा
मनुष्या नित्यदुःखिनः दिव्यमानुषचेष्टा तु परभागेन हारिणी विद्याधराणां चरितमतस्ते वर्णयाम्यहम् इति देव्या हरो यावद्वक्ति तावदुपागमत्
प्रसादवित्तकः शंभोः पुष्पदंतो गणोत्तमः न्यषेधि च प्रवेशोस्य नंदिना द्वारि तिष्ठता निष्कारणं निषेधोद्य ममापीति कुतूहलात् अलक्षितो योगवशा
त्प्रविवेश मतस्तत्क्षणात् प्रविश्य श्रुतवान्सर्वं वर्ण्यमानं पिनाकिना विद्याधराणां सप्तानामपूर्वचरिताद्भुतम् श्रुत्वा गत्वा च भार्यायै जयायै सोप्यवर्णयत्
को हि वित्तं रहस्यं वा स्त्रीषु शक्तो निगूहितुम् सापि तद्विस्मया विष्टा गत्वा गिरिसुताग्रतः जगौ जया पार्वती हारी त्वं गां वा कश्चनमः कुतः न जस्त्र कोपगिर
रिजा नापूर्वं वर्णितं त्वया जानाति हि जयाप्येतदिति तच्छ्रु त्वा रमध्यात् प्रणिधानादथ ज्ञात्वा जगादेममुमायतिः योगी भूत्वा प्रविश्येदं पुष्पदंत
स्तदाशृणोत् जयायै वर्णितं तेन नान्योजानात्यदः प्रिये श्रुत्वेत्यानाययद्देवी पुष्पदंतमतिक्रुधा मर्त्यो भवाविनीजेति विद्धलं तं शशाप सा मा
ल्यवंतं च विज्ञप्तिं कुर्वाणं तत्कृते गणम् नियसपादयोस्ताभ्यां जयया सहबोधिता शापान्तं प्रति शर्वाणी शनकैर्वचनमब्रवीत् विंध्याटव्यां कुबेर
स्य शापात्प्राप्तः पिशाचताम् सुप्रतीकाभिधो यक्षः काणभूत्याख्यया स्थितः तं दृष्ट्वा संस्मरन्जातिं यदा तस्मै कथामिमाम् पुष्पदंत प्रवक्ता सि त
दा शापाद्विमोक्ष्यसे काणभूतेः कथां तां तु यदा श्रोष्यति माल्यवान् काणभूतौ तदा मुक्ते कथां प्रख्याप्य मोक्ष्यसे इत्युक्त्वा शैलतनया व्यरमत्तौ च
तत्क्षणात् विद्युत्पुंजाविव गणौ दृष्टनष्टौ बभूवतुः अथ जातु याति काले गौरी प्रपच्छ शंकरं सदया देव मया तौ शप्तौ प्रमथवरौ कुत्र भुवि जातौ अवदच्चेंदु रा॰म॰ ३

© Dharmartha Trust J&K. Digitized by eGangotri

द्रमौलिः कौशांबीसमस्तियामहानगरी जस्यांसपुष्पदंतोवररुचिनामाप्रियेजातः अन्यश्चमाल्यवानपिनगरवरेसुप्रतिष्ठिताख्येतः जातोगुणाढ्यना
मादेवितयोरेषवृत्तांतः एवंनिवेद्यसविभुःमनतानुवृत्त्याप्रस्यावमाननविभावनसानुतापम् कैलासशैलतटकल्पितकल्पवृक्षलीलागृहेषुदयितां
रमयन्नुवाच इतिश्रीभट्टसोमदेवविरचितेकथासरित्सागरेकथापीठलंबकेप्रथमस्तरंगः ततःसमर्त्यवपुषापुष्पदंतःपरिभ्रमन् नाम्नावररुचिः
किंचकात्यायनइतिश्रुतः पारंसंप्राप्यविद्यानांकृत्वानंदस्यमंत्रिताम् खिन्नःसमाययौद्रष्टुंकदाचिद्विंध्यवासिनीम् तपसाराधितादेवीस्वप्नादेशेनसा
चतम् प्राहिणोद्विंध्यकांतारंकाणभूतिमवेक्षितुम् व्याघ्रवानरसंकीर्णंनिस्तोयपरुषद्रुमे भ्रमंस्तत्रसचप्रांशुंन्यग्रोधतरुमैक्षत ददर्शचसमीपे
स्यपिशाचानांशतैर्वृतम् काणभूतिंपिशाचंतंवर्ष्मणाशालसन्निभम् सकाणभूतिनादृष्ट्वाकृतपादोपसंग्रहः कात्यायनोजगादैतदुपविश्यक्ष
णांतरम् सदाचाराभवानेवकथमेतांगतिंगतः तच्छ्रुत्वाकृतसौहार्दंकाणभूतिस्तमब्रवीत् स्वतोमेनास्तिविज्ञानंकिंतुशर्वान्मयाश्रुतम् उज्जयिन्यां
श्मशानेयच्छृणुतत्कथयामिते कपालेषुश्मशानेषुकस्माद्देवरतिस्तव इतिपृष्टस्तदादेव्याभगवानिदमब्रवीत् पुराकल्पक्षयेवृत्तेजातंजलमयंजग
त् मयाततोविभिद्योरुंरक्तबिंदुर्निपातितः जलांतस्तदभूदंडंतस्माद्द्वेधागतात्पुमान् निर्गतस्ततःस्रष्टासर्गायप्रकृतिर्मया तौचप्रजापतीनन्यान्स
सृष्टवंतौप्रजाश्चते अतःपितामहःप्रोक्तःसपुमान्जगतिप्रिये एवंचराचरंसृष्ट्वाविश्वंदर्पमगादसौ पुरुषस्तेनमूर्धानमथतस्याहमच्छिदम् ततोनु
तापेनमयामहाव्रतमगृह्यत अतःकपालपाणित्वंश्मशानप्रियताचमे किंचैतन्मेकपालात्मजगद्हस्तेविकरेस्थितम् पूर्वोक्तांडकपालेद्वेरोदसीकी
र्तितेयतः इत्युक्तेशंभुनातत्रश्रोष्यामीतिसकौतुके स्थितेमयिततोभूयःपार्वतीतमब्रवीत् सपुष्पदंतःकियताकालेनास्मानुपैष्यति तदाक

© Dharmartha Trust J&K. Digitized by eGangotri

क.स.१ र्णविदद्देव्यां मामुद्दिश्य महेश्वरः पिशाचोहस्यपतेयोयमेषवैश्रवणानुगः पत्रोमित्रमभूद्राक्षसः स्थूलशिराइति संगतं तेन पापेन निरीक्ष्येनं धना
३ धिपः विंध्याटव्यां पिशाचत्वमादिशद्धनदेश्वरः भ्राताग्रास्य दीर्घजंघेन पतित्वा पादयोस्ततः शापांतं प्रति विज्ञप्तो वदति स्म धनाधिपः शापावतीर्णा
3 द्राकर्ण्य पुष्पदंतान्महाकथाम् उक्त्वा माल्यवतस्तांच शापात्सार्धमस्य मर्त्यताम् आभ्यां गणाभ्यां सहितः शापमेवं तरिष्यति इत्यहं धनदेनास्य शापांतो
विहितस्तथा त्वयाच पुष्पदंतस्य स एवोक्तिः स्मर प्रिये एतच्छ्रुत्वा वचः शंभोः सहर्षोहमिहागतः इत्थं मे शापदोषोयं पुष्पदंतागमावधिः इत्युक्त्वा विरते
तस्मिन्काणभूतौ च तत्क्षणात् स्मृत्वा वररुचिर्जातिं सुप्तोत्थित इवाब्रवीत् स एव पुष्पदंतोहं मत्तस्तां च कथां शृणु इत्युक्त प्रलक्षाणि सप्तमहाकथाः
कात्यायनेन कथिताः काणभूतिस्ततोब्रवीत् देव रुद्रावतारस्त्वं कोन्यो वेत्ति कथामिमाम् त्वत्प्रसादाद्गतप्रायः स शापो मे शरीरतः तद्ब्रूहि निजवृत्तांतं ज
न्मतः प्रभृति प्रभो मां पवित्रय भूयोपि न गोप्यं यदि मादृशे ततो वररुचिस्तस्य प्रणतस्यानुरोधतः सर्वमाजन्मवृत्तांतं विस्तरादिदमब्रवीत् कौशांब्यां
सोमदत्ताख्यो नाम्नाग्निशिखइत्यपि द्विजोभूत्तस्य भार्या च वसुदत्ताभिधाभवत् मुनिकन्या च सा शापात्तस्यां योनाववातरत् तस्यां तस्माद्द्विजवरा
देष जातोस्मि शापतः ततो मयातिबालस्य पिता पञ्चत्वमागतः अतिष्ठद्वर्धयंती तु माता मां कृच्छ्रकर्मभिः अथाभ्यगच्छतां विप्रौ द्वावस्मद्गृहमेकदा
एकरात्रिनिवासार्थं दूराध्वपरिधूसरौ तिष्ठतोस्तत्र चैतयोरुदभून्मुरजध्वनिः तेन मामब्रवीन्माता भर्तुः स्मृत्वा सगद्गदम् नृत्यत्येष पितुर्मित्रं तव नंदो
नटः सुत अहमप्यवदं मातुर्द्रष्टुमेतद्व्रजाम्यहम् तवापि दर्शयिष्यामि समार्थं सर्वमेव तत् एतन्मद्वचनं श्रुत्वा विप्रौ तौ विस्मयं गतौ अवोचतां च राम
मन्माता हे पुत्रो नात्र संशयः सकृच्छ्रुतमयं बालः सर्वं चावधारयेत्यदि जिज्ञासार्थं मयाभ्यां मे प्रातिशाख्यमपठ्यत ततोवजन्मया सर्वं यथितं पश्यतो ३

स्तयोः ततस्ताभ्यां समं गत्वाहं स्वानधर्जयैवततः गृहे मे साग्रतो मातुः समग्रं दर्शितं मया एकश्रुतिधरत्वेन मां निश्चित्य कथामिमाम् आडिनामातयो
रेको मन्मातुः प्रणतोऽब्रवीत् वेतसाख्ये पुरे मातर्देवस्वामिकरंभकौ अभूतां भ्रातरौ विप्रावतिप्रीतौ परस्परम् तयोरेकस्य पुत्रोयमिंद्रदत्तोपरस्य तु अहं
आंडिः मम सद्यो मम पिता स्वं गतस्ततः तच्छोकादिंद्रदत्तस्य पिता यातो महापथम् अस्मज्जनन्योश्च तदा स्फुटितं हृदयं ततः तेनानाथौ सधनेप्यावां वि
द्याभिकांक्षिणौ गत्वोपार्थयितुं स्वामिकुमारं तपसा ततः तपःस्थितौ च तत्रावां स्वप्ने प्रभुरादिशत् अस्ति पाटलिकं नाम पुरं नंदस्य भूपतेः तत्रास्ति वेको
वर्षाख्यो विप्रस्तस्माद्वाप्स्यथः कृत्स्नां विद्यामतस्तत्र युवाभ्यां गम्यतामिति अथावां तत्पुरं यातौ पृच्छतोस्तत्र चावयोः अस्तीह मूर्खो वर्षाख्यो विप्र
इत्यवदज्जनः ततो दोलाधिरूढेनागत्वा चिंतेन तत्क्षणात् गृहमावामपश्याव वर्षस्य विधुरास्थिति मूषकैः कृतवल्मीकं भित्तिविश्लेषजर्जरम् वि
च्छायं रूक्षदिग्धाहीनं जन्मक्षेत्रमिवापदाम् तत्र ध्यानस्थितं वर्षमालोक्याभ्यंतरे तदा उपागतौ तत्तस्य पत्नी विहितातिथ्यसत्क्रियाम् धूसरक्षामपुरुषं विशीर्ण
मलिनांबराम् गुणरागागतां तस्य रूपिणीमिव दुर्गतिम् प्रणामपूर्वमावाभ्यां तस्यै सोऽयं निवेदितः स्ववृत्तांतश्च तद्भर्तुर्मौर्ख्यवार्त्ता च या श्रुता पुत्रौ पूर्वा
मेकालज्ञाश्रूयतां कथयाम्यहम् इत्युक्त्वा सावयोः साध्वी कथामेतामवर्णयत् शंकरस्वामिनामात्र नगरेभूद्द्विजोत्तमः मह्यं भ्राता चोपवर्षश्च तस्य पुत्राविमावु
भौ अयं मूर्खो दरिद्रश्च विपरीतोस्य चानुजः तेन चास्यानियुक्ताभूत्तत्र भार्यागृहपोषणे कदाचिदथ संप्राप्ताप्रावृट्स्यां च योषितः मया गुडं पिष्टरचितं गुह्य
रूपं जुगुप्सितम् कृत्वा विप्राय मूर्खो दत्तस्तेवं कृजे हिताः शीतकाले निदाघे च स्नानक्लेशवक्रमापाहम् इत्यनप्रतिपद्यं तद्भ्रांताचारो हि कुत्सितः तद्वैवरगृहीता
मे दत्तमस्मै सद्दक्षिणम् तद्गृहीतायमायानिर्मीतितोस्मशम मूर्खभावकृतेर्नीतमेसुना पर्यतप्यत ततः स्वामिकुमारस्य पादमूलं गतोभवत् तपस्तुष्टे

© Dharmartha Trust J&K. Digitized by eGangotri

क॰ सा॰ १

४

५

नतेनास्य सर्वा विद्याः प्रभाषिताः सकृच्छ्रुतधरं विप्रं प्राप्यैतास्त्वं प्रकाशयेः इत्यादिष्टः स तेनैव संहृष्टो यमिहागतः आगत्यैव च वृत्तान्तं सर्वमस्यै न्यवे
दयत् तदाप्रभृत्यसविरतं जपन् ध्यायंश्च तिष्ठति अतः श्रुतधरं किंचिदन्विष्यानयतं युवाम् तेन सर्वार्थसंसिद्धिर्भविष्यति न संशयः श्रुत्वैतद्वर्ष
पत्नीतस्तूर्णं दौर्गत्यसह्यानपे दत्वा हेमशतं चास्यै निर्गतौ स्वस्ततः पुरात् अथ यावत्पृथिवीं भ्रामो न च श्रुतधरं क्वचित् लब्धवन्तौ ततः श्रान्तौ प्राप्ता वयं गृ
हं तव एकः श्रुतधरः प्राप्तो बालोऽयं तनयस्तव तदेनं देहि गच्छामो विद्याद्रविणसिद्धये इति व्याडिवचः श्रुत्वा मामम्बा सादरावदत् सर्वं संगतमे
वैतदस्त्यत्र प्रत्ययो मम तथाहि पूर्वं जातेऽस्मिन्नेकपुत्रे मम स्फुटा गगनादेवमुदभूदशरीरा सरस्वती एकश्रुतधरो जातो विद्यां वर्षादवाप्स्यति किं
च व्याकरणं लोके प्रतिष्ठां प्रापयिष्यति नाम्ना वररुचिश्चायं तत्तदस्मै हि रोचते यद्यद्वरं भवेत्किंचिदित्युक्त्वा वागुपारमत् अत एव विवृद्धेऽस्मिन्बा
लके चिन्तयाम्यहम् क्व स वर्षमुपाध्यायो भवेदिति दिवानिशम् अद्य युष्मन्मुखाच्छ्रुत्वा परितोषश्च मे परः तदेनं नयतं भ्राता युवयोरेष का क्षतिः इ
ति मन्मातृवचनं श्रुत्वा तौ हर्षनिर्भरौ व्याडीन्द्रदत्तौ तां रात्रिमबुध्येतां क्षणोपमाम् अथोत्सवार्थमम्बायास्तूर्णं दत्वा निजं धनम् व्याडिनेवोपनीता
हं वेदार्हत्वं ममेच्छता ततो मात्राभ्यनुज्ञातं कथंचिद्रुद्धबाष्पया मामादाय निर्जातसाह शमिताशोषतद्व्यथम् मन्यमानौ च कौमारं पुष्पितं ज्वदन्तु
यहम् व्याडीन्द्रदत्तौ तरसा नगर्याः प्रस्थितौ ततः अथ क्रमेण वर्षस्य गुरोः प्राप्ताः वयं गृहम् स्कन्दप्रसादमायातं मूर्तं मां सोऽप्यमन्यत श्वस्त्वारम्भं ततो
मे धृरुपविष्टः शुचौ भुवि वर्षोपाध्याय ओंकारमकरोद्दिव्यया गिरा तदनन्तरमेवास्य वेदाः साङ्गा उपस्थिताः अध्यापयितुमस्मांश्च प्रवृत्तोऽभूदसौ त रामः ४
तः सकृच्छ्रुतं मया तत्र द्विः श्रुतं व्याडिना तथा त्रिः श्रुतं चेन्द्रदत्तेन गुरुणोक्तमगृह्यत ध्वनिमश्रुतमपूर्वं दिव्यमाकर्ण्य सत्वरः सपदि विलसदन्तर्विस्मयो

© Dharmartha Trust J&K. Digitized by eGangotri

विप्रवर्गः किमिदमिति तममंताद्भुतमभ्येत्य वर्षसंकीर्तिमुखरमुखश्चार्चयति स्म गणैः किमयितद्वलोकयन्नत्र चित्तं प्रमदवशान्नपरं तदेव वर्षः अपिवि
ततमहोत्सवःसमग्रः समजनि पाटलिपुत्रे पौरलोकः राजापि तं गिरिशसूनुवरप्रभावमालोक्य तस्य परितोषमुपेत्य नंदः वर्षस्य वेश्म वसुभिः सकिला
दरेण तत्कालमेव सममपूपुरदुन्नतश्रीः इति श्रीमहासोमदेवविरचिते कथासरित्सागरे कथापीठलंबके द्वितीयस्तरंगः एवमुक्त्वा वररुचिः शृण्वत्येकाग्र
मानसे काणभूतौ वने तत्र पुनरेवेदमब्रवीत् कदाचिद्याति काले थ कृतस्वाध्यायकर्मणि इति वर्षउपाध्यायः पृष्टोस्माभिः कृताह्निकैः इदमेवंविधं कस्मा
न्नगरं क्षेत्रतां गतम् सरस्वत्याश्च लक्ष्म्याश्च तदुपाध्याय कथ्यताम् तच्छ्रुत्वा सोब्रवीदस्मान् शृणुतैतत्कथामिमाम् तीर्थं कनखलं नाम गंगाद्वारे स्ति पाव
नम् यत्र कांचनपातेन जाह्नवी देवदंतिना उशीनरगिरिप्रस्थाद्भित्वा तमवतारिता दाक्षिणात्यो द्विजः कश्चित्तपस्यन्भार्यया सह तत्रासीत्तस्य चात्रैव जायं
ते स्म त्रयः सुताः कालेन स्वर्गते तस्मिन्सभार्ये ते च तत्सुताः स्थानं राजगृहं नाम जग्मुर्विद्यार्जनेच्छया तत्र चाधीतविद्यास्ते त्रयो प्यनाथदुःखिताः ययुः
स्वामिकुमारस्य दर्शनं दक्षिणापथम् ततस्ते चिंचिनीं नाम नगरीमंबुधेस्तटे गत्वा भोजिकसंज्ञस्य विप्रस्य न्यवसन्गृहे स च कन्या निजास्तिस्रस्तेभ्यो दत्वा
धनानि च तपसेनन्यसंतानो गंगां याति स्म भोजिकः अथ तेषां निवसतां तत्र श्वशुरवेश्मनि अवग्रहकृतस्तत्र दुर्भिक्षः समजायत तेन भार्याः परित्य
ज्य साध्वीस्तास्ते त्रयो ययुः स्पृशंति न नृशंसानां हृदयं बंधुबुद्धयः ततश्च मध्यमा तासां सगर्भाभूत्ततश्च ताः भवनं यज्ञदत्तस्य पितृमित्रस्य शिश्रियुः तत्र तस्थु
र्निजान्भर्तॄन्ध्यायंत्यः क्लेशदुःखिताः आपद्यपि सतीवृत्तं किं मुंचंति कुलस्त्रियः कालेन मध्यमा चात्र तासां पुत्रमसूत सा अन्योन्यातिशयात्तस्मिन्स्नेहस्ता
सामवर्धत कदाचिद्व्योममार्गेण विहरंतं महेश्वरम् अंकस्था स्कंदजननी तत्र दृष्ट्वा सदावदत् देव पश्य शिशावस्मिन्नेतास्तिस्रोपि योषितः बद्धस्नेहाद

© Dharmartha Trust J&K. Digitized by eGangotri

भ॰स्कं॰१ धस्याशामेषोस्मान्नजीवयिष्यति तत्तथाकुरु येनायमेता बालोपि जीवयेत् इत्युक्तः प्रियया देवो वरदः स जगाद ताम् अनुगृह्णाम्यमुं पूर्वं सभार्येणामुना
५ यतः आराधितोस्मि तेनायं भोगार्थं निर्मितो भुवि एतज्जाया च सा जाता पाटली नाम भूपतेः महेन्द्रवर्मणः पुत्री भार्यास्यैव भविष्यति इत्युक्त्वा स विभुः स्व
5 प्ने साध्वीस्तिरो जगाद ताः नाम्ना पुत्रक एवायं युष्माकं बालपुत्रकः अस्य सुप्तप्रबुद्धस्य शीर्षान्ते च दिने दिने सुवर्णलक्षं भविता राजा यश्च भविष्यति
ततः सुप्तोत्थिते तस्मिन् बाले ताः प्राप्य कांचनम् यज्ञदत्तसुताः साध्वीर्ननन्दुः फलितव्रताः अथ तेन सुवर्णेन वृद्धकोशो चिरेण सः बभूव पुत्रको राजा तपो
धीना हि सिद्धयः कदाचिद्यज्ञदत्तोथ रहः पुत्रकमब्रवीत् राजन् दुर्भिक्षदोषेण क्वापि ते पितरो गताः तस्माद्देहि विप्रेभ्यो येनायान्ति निशम्य ते ब्रह्मनैदत्त
कथां चैतां कथयाम्यत्र तच्छृणु वाराणस्यामभूत् पूर्वं ब्रह्मदत्ताभिधो नृपः सोपश्यद्धंसयुगलं प्रयान्तं गगने निशि विस्फुरत्कनकच्छायं राजहंसशतैर्वृ
तम् विद्युत्पुंजमिवाकाण्डसिताभ्रपरिवेष्टितम् पुनस्तद्दर्शनोत्कण्ठा तथास्य ववृधे ततः तथा नृपतिसौख्येषु बबन्ध न रतिं क्वचित् मंत्रिभिः सह संमन्त्र्य
ततश्चाकारयत्सरः स राजा नुमते कान्तं प्राणिनां चाभयं ददौ तत्र कालेन तौ प्राप्तौ हंसौ राजा ददर्श सः विश्वस्तौ चापि पप्रच्छ हैमे वपुषि कारणम् व्यक्त
वाचौ ततस्तौ तु हंसौ राजानमूचतुः पुरा जन्मान्तरे काकावावां जातौ महीपते बल्यर्थं युध्यमानौ च पुण्ये शून्ये शिवालये विनिपत्य सविपन्नौ स्वस्तत्स्था
ने द्रोणिकान्तरे जातौ जातिस्मरावावां हंसौ हेममयौ ततः तच्छ्रुत्वा तौ यथाकामं पश्यन्राजा तुतोष सः अतोऽनयादृशं दिव्यं पितॄन्दानाद्वाप्स्यसि इत्यु
क्तो यज्ञदत्तेन पुत्रकस्तत्तथाकरोत् श्रुत्वा प्रदाने वार्तां तामाययुस्ते द्विजातयः परिज्ञाताः परां लक्ष्मीं पत्नीभ्यः सह लेभिरे आश्चर्यमपि निःसाज्यो दृष्टन राम॰
स्तापदामपि अविवेकान्धबुद्धीनां स्वानुभावो दुरात्मनाम् कलिना राज्यकामास्ते पुत्रकं तं जिघांसवः निन्युस्तद्दर्शनव्याजाद्द्विजा विन्ध्यवासिनीम् वधका ५

© Dharmartha Trust J&K. Digitized by eGangotri

स्थापयित्वा च देवीगर्भगृहांतरे तमूचुः पूर्वमेकस्त्वं पश्य देवीं प्रजांतरम् ततः प्रविश्य विश्वासात्स दृष्ट्वा दंतमुपयतान् पुनस्तान्पुत्रकोऽपृच्छत्कस्मान्निहथ
मामिति पितरभित्तेप्रयुक्ताः स्म स्वर्णादत्वेति चाब्रुवन् ततस्तान्मोहितान्दृष्ट्वा बुद्धिमान्पुत्रकोऽवदत् राज्यमेतदर्धं स्वरत्नालंकारांनिजम् मां मुंचत
करोम्यत्रनोऽद्रष्ट्यामिदूरतः एवमस्त्विति ते तस्माद्गृहीत्वा वधका गतः हतः पुत्रक इत्यूचुस्ते सिद्धार्थपुरो मृषा ततः प्रतिनिवृत्तास्ते हता राज्यार्थिनो
मे द्विजाः मिथो भिन्ना द्रोहिणो बुद्ध्वा तत्रान्नाशिवं कृतः अत्रांतरे स राजापि पुत्रकः सममंगरः विवेश विंध्यकांतारं विरक्तः स्वेषु बंधुषु भ्रमन्नपश्यत्तत्रा
सौ बाहुयुद्धैकसंतरौ पुरुषौ द्वौ नत तौ स पप्रच्छ वां कौ युवामिति मयासुरसुतावावां तदीयं चास्तिनो धनम् इदं भाजनमेषा च यष्टिरेते च पादुके एतन्नि
मित्तं युद्धं नौ यो बली स हरेदिति एतत्तद्वचनं श्रुत्वा हसन्प्रोवाच पुत्रकः कियदेतद्धनं पुंसस्ततः समवोचताम् पादुके परिधायैते खेचरत्वमवाप्यते यष्ट्या य
च्लिख्यते किंचित्सत्यं संपद्यते हि तत् भाजने यो य आहारश्चिंत्यते स मतिष्ठति तच्छ्रुत्वा पुत्रको वाच किं युद्धेनास्त्वयं पणः धावत्कला विधिकोपः स्यात्स
एवैतद्धरेदिति एवमस्त्विति तौ मूढौ धावितौ सोपि पादुके अध्यास्योदपतद्व्योम गृहीत्वा यष्टिभाजने अथ दूरं क्षणाद्गत्वा ददर्श नगरीं शुभाम् आकर्षि
कारख्यातस्यां चन भसो वततार सः वंचनप्रवणा वेश्या द्विजा मित्राराये यथा वणिजो धनलुब्धाश्च कस्य गेहे वसाम्यहम् इति संचिंतयन्प्राप स राजा विजनं गृ
हम् जीर्णं तदंतरे चैकां वृद्धां योषितमैक्षत प्रदानपूर्वं संतोष्य तां वृद्धामादृतस्तया उवास लक्षितस्तत्र पुत्रकः शीर्णमनि कदाचित्साथ संप्रीता वृद्धा पु
त्रकमब्रवीत् चिंता मे पुत्र यद्भार्या सदृशी नास्ति ते क्वचित् इहैव तु सुता त्वस्य पाटली सत्रि कन्यका उपर्यन्तःपुरे सा च रत्नमिस्त्यभिरक्षते एतद्वृद्धा वचस्तस्य
दत्तकर्णस्य श्रावतः विवेश तेनैव पथा लुघरं धोहृदिस्मरः दृष्ट्या सा मया धैव कांतेति कृतनिश्चयः निशायां नभसा तत्र पादुकाभ्यां जगाम सः प्रविश्य सो

© Dharmartha Trust J&K. Digitized by eGangotri

क॰लं॰१
६
6

दिग्गंगाढ्यत्तुंगवातायनेन ताम् अंतःपुरे ददर्शायं सुतां राज्ञः स पाटलीम् सेव्यमानामविरतं चंद्रकांतां गलयोधि जित्वा जगदिदं श्रांतां मूर्तां शक्तिं मनोभुवः
कथं प्रबोधयाम्येनामिति यावदचिंतयत् इत्यकस्माद्बहिस्तावद्यामिकः पुरुषो जगौ आलिंग्य मधुरकूजितमलसोन्मिषदीक्षणां रहः कांताम् प्रबोध-
यंति सुप्तां जन्मनि पुंसां तदेव फलम् श्रुत्वैवैतत्सुतो हृष्टस्तमंगैरुत्कंपविक्लवैः आलिलिंग ततः कांता प्राबुध्यत ततश्च सा पश्यंत्यास्तं नृपं तस्या लज्जाकौ-
तुकयोर्हृदि अभूद्दस्योन्मत्तमदैरिव चं समागतम् अथालापे कृतेऽन्योन्यं गांधर्वोद्वाहकर्मणि अवर्धत तयोः प्रीतिर्दंपत्योर्न तु यामिनी आमंत्र्याथ वधूं सु-
त्वान हृतेन तु चेतसा आययौ पश्चिमे भागे तद्दृष्ट्वा वेश्म पुत्रकः इत्थं प्रतिनिशं तत्र कुर्वाणोऽस्मिन्नानागतम् संभोगचिह्नं पाटल्या रक्षिभिर्दृष्टमेकदा ज्ञैस्ततो वे-
दितं तैस्य हावेदितं तस्याः पितुः सोऽपि नियुक्तवान् गूढमंतःपुरे तत्र निशि नारीमवेक्षितुम् तया च तत्र प्रसुप्तस्य तत्राभिज्ञानसिद्धये पुत्रकस्य प्रसक्तस्य न्यस्तं वा-
सस्यलक्तकम् प्रातस्तया च विज्ञप्तो राजा चारान्व्यसर्जयत् सोऽभिज्ञानेन चैतैः प्राप्तः पुत्रको जीर्णवेश्मतः आनीतोऽतो जनिकटं कुपितं वीक्ष्य तं नृपम् पादुका-
भ्यां सुसुप्तस्य पाटलीमंदिरे विशत् विदितौ स्वस्तदुत्तिष्ठ गच्छावः पादुकावशात् इत्यंके पाटलीं कृत्वा जगाम नभसा ततः अथ गंगातटनिकटे गगनादवती-
र्य सप्रियां श्रांताम् पात्रप्रभावजातैराहारैर्नंदयामास आलोकितप्रभावः पाटल्या पुत्रकोऽर्थितश्च ततः यष्ट्यालिलेख च सत्र नगरं चतुरंगबलयुक्तम् तत्र
स राजाभूत्तां महाप्रभावस्त्र समस्तां प्राप्य नमयित्वा तं श्वशुरं शशास पृथ्वीं समुद्रांताम् तदिदं दिव्यं नगरं मायारचितं सपौरमत एव ख्यातं पाटलिपुत्रं लक्ष्म्या
सरस्वत्योः इति वर्षमुखादिमामपूर्वां वयमाकर्ण्य कथामतीव विचित्राम् चिरकालमभूत्स काणभूतिर्विलसद्विस्मययोगारमानचित्तः इति श्रीभट्टसोमदेव
विरचिते कथासरित्सागरे कथापीठलंबके तृतीयस्तरंगः इत्याख्याय कथां मध्ये विंध्यांतः काणभूतये पुनर्वररुचिस्तस्मै प्रकृतार्थामवर्णयात् एवं व्याडी इ-

तरं॰
६

ताभ्यांसहचवसन्क्रमात् प्राप्तोहंसर्वविद्यानांपारमुत्क्रान्तशैशवः इंद्रोत्सवंकदाचिच्चप्रेक्षितुंनिर्गतावयम् कन्यामेकामपश्याम कामस्यास्त्रममायिकम्

इंद्रदत्तोमयापृष्टोथततःकेयंभवेदिति उपवर्षसुतासेयमुपकोशेतिसोब्रवीत् सासखीभिश्चमांज्ञात्वाप्रीतिपेशलयादृशा कर्षंतीमनसःकृच्छ्रादगच्छद्भ

वनंनिजम् पूर्णचंद्रमुखीनीलनीरजोत्पललोचना मृणालनाललुलितभुजापीनस्तनोज्ज्वला कंबुकंठीप्रवालाभरदनच्छदशोभिनीस्मरभूपतिसौंदर्य

मंदिरेवेदिकापरा ततःकामशराघातनिर्भिन्नहृदयेनमेनिशितस्यामभून्निद्रानतद्बिंबोष्ठपिपासया कथंचिल्लब्धनिद्रोहमपश्यंरजनीक्षये शुक्लांबरधरांदि

व्यांस्त्रियंसामामभाषत पूर्वभार्योपकोशातेगुणज्ञानापरंपतिम् कंचिदिच्छत्यतश्चिन्तापुत्रकार्यात्रनत्वया अहंसदाशरीरान्तर्वासिनीतेसरस्वती त्वद्दुः

खंनोसहेद्रष्टुमित्युक्त्वान्तर्हिताभवत् ततःप्रबुद्धोजातास्थोगत्वातिष्ठमहंशनैः दयितामंदिरासन्नबालचूततरोरधः अथागत्यसमाख्यातंतत्सख्याममत्रि

बंधनम् तद्गाढमुपश्रुत्यमनवागानंदविजृंभितम् ततोहंद्विगुणीभूतत्रपस्तामेवमब्रुवम् अदत्तांगुरुभिर्बन्धुमुपकोशांकथंभजे वरंहिमृत्युर्नाकीर्तिस्तत्स

खीहृदयंतव गुरुभिर्यदिबुध्येततत्कदाचित्सिद्धिंभवेत् तदेतत्कुरुभद्रेत्वंतामाश्वासयजीवय तच्छ्रुत्वासागतातस्यामातुःसर्वंन्यवेदयत् ततस्तयाकथितंभ

र्तुरुपवर्षस्यतत्क्षणम् तेनभ्रातुश्चवर्षस्यतेनतच्चाभिनंदितम् विवाहेनिश्चितेगत्वाव्याडिरानयतिस्मताम् वर्षाचार्यनिदेशेनकौशाम्ब्याजननींमम अ

थोपकोशाविधिवत्पित्रामेप्रतिपादिता ततोमात्रागृहिण्याचसमंतत्रावसंसुखम् अथकालेनवर्षस्यशिष्यवर्गोमहानभूत् तत्रैकःपाणिनिर्नामजड

बुद्धितरोभवत् सशुश्रूषापरिक्लिष्टःप्रेषितोवर्षभार्यया अगच्छत्तपसेखिन्नोविद्याकामोहिमालयम् तत्रतीव्रेणतपसातोषितादिन्दुशेखरात् सर्ववि

द्यामुखंतेनप्राप्तंव्याकरणंनवम् ततश्चागत्यमामेववादायाह्वयतेस्मसः प्रवृत्तेचावयोर्वादेप्रयाताःसप्तवासराः अष्टमेह्निमयातस्मिन्जितेतत्समनंतरं

© Dharmartha Trust J&K. Digitized by eGangotri

व॰के॰ १
७
7

म् नभस्थेन महाघोरो हुंकारः शंभुना कृतः तेन प्रनष्टमैंद्रं तदस्मद्व्याकरणं भुवि जिताः पाणिनिना सर्वे मूर्खीभूता वयं पुनः अथ संजातनिर्वेदः स्वगृहस्थि
तये धनम् हस्ते हिरण्यगुप्तस्य निधाय वणिजो निजम् उक्त्वा चोपकोशायै गतवानस्मि शंकरम् तपोभिराराधयितुं निराहारो हिमालयम् उपकोशा
हि मे श्रेयः कांक्षंती निजमंदिरे अतिष्ठत्प्रत्यहं स्नांती गंगायां नियतव्रता एकदा सा मधौ प्राप्ते क्षामा पांडुर्मनोरमा प्रतिपच्चंद्रलेखेव जनलोचनहारि-
णी स्नांतुं त्रिपथगां यांती दृष्टा राजपुरोधसा दंडाधिपतिना चैव कुमारसचिवेन च ततःक्षणात्ते गताः सर्वे स्मरसायकलक्ष्यताम् सापि तस्मिन्दिने स्ना-
ती कथमप्यकरोच्चिरम् आगच्छंतीं च सायं तां कुमारसचिवो हठात् अग्रहीदथ साप्येनं बभाषे प्रतिभावती अभिप्रेतमिदं भद्र यथा तव तथा मम किं
त्वहं सत्कुलोत्पन्ना प्रवासस्थितभर्तृका कथमेवं प्रवर्तेयं पश्येत्कोपि कदाचन ततश्च ध्रुवमयशो यस्त्वया सह भवेन्मम तस्मान्मधूत्सवाक्षिप्तपौरलोके गृ
हे मम आगंतव्यं ध्रुवं रात्रेः प्रथमे प्रहरे त्वया इत्युक्त्वा कृतसमया तेन त्यक्ता विधिवशात् यावत्किंचिद्गता तावन्निरुद्धा सा पुरोधसा तस्यापि तत्रैव दिने
तद्वदेव तया निशि संकेतकं द्वितीयस्मिन्प्रहरे परिकल्पितम् मुक्ता कथं चित्तेनापि प्रयाता किंचिदंतरम् दंडाधिपोऽरुणद्विमत्ततो यस्यां तु विह्वलाम् अ
थ तस्यापि दिवसे तस्मिन्नेव तृतीये वासा संकेतकं त्रियामायां तृतीये प्रहरे व्यधात् दैवात्तेनापि निर्मुक्ता सकंपा गृहमागमत् संविदं सा स्वचेटीनां कृत्वेयं से
रमब्रवीत् वरं यशो प्रवासस्थे मरणं कुलयोषितः ननु भर्तरि सद्वोकुलोचनायातपात्रता इति संचिंतयंती च स्मरंती मां विनायका शोचंती स्वं वपुः साध्वी
निराहारैव तां निशाम् प्रातर्ब्राह्मणपूजार्थं व्यसर्जि वणिजस्तया चेटी हिरण्यगुप्तस्य किंचिन्मार्गयितुं धनम् आगम्य सोपि तामेवमेकांते वणिगब्रवीत् राम. ७
भज स्व मां ततो भर्तुः स्थापितं ते ददामि तत् तच्छ्रुत्वा सा हि रहितां मत्वा भर्तृधनस्थितिम् वणिजं पापमालोक्य खेदामर्षकर्षिता तस्मा एव समं संकेतं रात्रौ या

© Dharmartha Trust J&K. Digitized by eGangotri

मेपिपश्चिमे शेषसंकेतकंयामेमाकोशदयेतोगमत् ततःसाकारयद्भूरिचेटीभिःकुंडकस्थितम् कस्तूरिकादिसंयुक्तंकज्जलंतैलमिश्रितम् जन्तिसाश्चार
खंडाश्चचत्वारोविहितास्तया मंजूषाकारिताचाभूत्स्थूलासावाहिरर्गला अथस्मिंस्तेन्महावेशोवसंतोत्सववासरे आययौप्रथमेयामेकुमारसचिवोनि
शि अलंकृतप्रविष्टंतमुपकोशेदमब्रवीत् अस्नातंनस्पृशामित्वांतत्स्नाहिप्रविशांतरम् अंगीकुर्वत्ततंनष्टचेटिकाभिःप्रवेशितः अभ्यंतरगृहंगुप्त
मंधकारमयंततःगृहीत्वातत्रतस्यांतर्वस्त्राण्याभरणानिच चीरखंडंतमेकंचदत्त्वातर्वासमःकृते आशिरःपादमंगेषुताभिस्तत्तैलकज्जलम् अभ्यं
गभंग्यापापस्यथस्तेघनमपश्यतः अतिष्ठन्मर्दयंस्तत्तस्यसंगंयावदस्यताः तावद्द्वितीयेप्रहरेसपुरोधाउपागमत् मित्रवररुचेःभ्रातः किमप्यथपुरोहि ग
तः तदिहप्रविशसुस्नाचेयस्नातस्तंजथाविधम् कुमारसचिवंत्रुग्रांमंजूषायाससंभ्रमम् निविक्षिपुरथावधुन्नर्गलिनवहिश्वजम् सोपिस्नानमिषान्नी
तस्तमस्यंतःपुरोहितःतथैवदत्तवस्त्राभिस्तैलकज्जलमर्दनैःचीरखंडधरस्तावच्चेटिकाभिर्विमोहितःयावत्तृतीयप्रहरेदंडाधिपतिरागमत् तदागमनजं
मत्वाचेटीभिःसहसाभयम् आपवत्सोयिनिक्षिप्तोमंजूषायांपुरोहितःतस्यदत्त्वार्गलिंताभिःस्नानव्याजात्सवेश्यसः दंडाधिपोपितत्रैवतावत्कज्जल
मर्दनैःअभ्यवहिप्रलघायम् चीरखंडैककर्पटःपावत्सपश्चिमेयामेवणिक्तत्रागतोभवत् तद्दर्शनभयंमत्वाक्षिप्तोदंडाधिपोप्यथ मंजूषायांचेटी स
भिर्दत्तंचबहिरर्गलम् तेचत्रयांधतामिस्रवासाभ्यासोघतास्त्व मंजूषास्थामियामोस्पर्शलह्णापिनालपनद्वचायदीपंगेहेत्ववणितंतुप्रवेश्यसा उप
कोशावदद्देहितन्मेभर्त्रार्पितंधनम् तच्छ्रुत्वाशून्यमालोक्यगृहंसोप्यवदच्छठः उक्तंमयाददाम्येवयद्भर्त्रास्थापितंधनं उपकोशापिमंजूषांश्रावयंती
ततोब्रवीत् एतद्धिरण्यगुप्तस्यवचःशृणुतदेवताःइत्युक्त्वाचैवनिर्वाप्यदीपंसोप्यमवद्वणिक् लिप्तःस्नानापदेशेनचेटीभिकज्जलेतुश्चिरम् अंगेयच्छग

© Dharmartha Trust J&K. Digitized by eGangotri

वृ.कं.१ नानाविधैस्तुकः स निशान्ते श्वनिष्ठुनालहस्तेन ताभिर्निर्वासितस्ततः । अथ चीरकवसनो मषीलिप्तः पदे पदे भक्ष्यमाणः श्वभिः प्रापल्लज्जमानो निजं गृह
८ म् । तत्र दासजनस्नापितां प्रक्षालयतो मषीम् । नाशकत्तमसुखः स्थातुं कश्चित्स्वविनयक्रमः । उपकोशाप्यथ प्रातश्चेटिकानुगता गता । गुरूणामनिवेद्यै॰
४ व राज्ञो नन्दस्य मन्दिरम् । वणिग्घिरण्यगुप्तो मे भर्त्रा न्यासीकृतं धनम् । जिहीर्षतीति विज्ञप्तस्तत्र राजा जातपास्वयम् । तेन तच्च परिज्ञातुं नन्देनानायितो वणिक्
मद्धस्ते किंचिदप्यस्या देव नास्तीति भाषतः । उपकोशा ततोऽवादीत्सन्ति मे देव साक्षिणः । मंजूषां पागतः क्षिप्त्वा भर्त्रा मे गृहदेवताः । स्ववाचा पुरतस्तासाम्
नेनाङ्गीकृतं धनम् । तामानाय्येह मंजूषां पृच्छ्यन्तां देवतास्त्वया । तच्छ्रुत्वा विस्मयाद्राजा तदानयनमादिशत् । ततः कृष्णास्ता मंजूषामाप्रायिता बहुभिर्ज
नैः । अथोपकोशावक्सत्यमसंवदत देवताः । परुक्तं वणिजानेन ततोपात्तं निजं गृहम् । नो चेद्दाहाम्यहं युष्मान्सद्यस्तु हट्टयामिवः । तच्छ्रुत्वा भीतभीतास्ते
मंजूषास्था वभाषिरे । सत्यं समक्षमस्माकमनेनाङ्गीकृतं धनम् । ततो निरुत्तरः स च वणिक् स्वं समर्पयत् । उपकोशामथाभ्यर्थ्य राज्ञा ज्ञातिकुतूहलात्
सदस्युद्घाटिता तत्र मंजूषा स्फोटितार्गला । निष्क्रान्तास्तेऽपि पुरुषास्तमःपिंडवत्तपः । कृच्छ्रात्प्रत्यभिज्ञाता मंत्रिभिर्भूपतेस्तथा । प्रहसत्स्वथ सर्वेषु ।
किमेतदिति कौतुकात् । राज्ञा पृष्टा सती सर्वमुपकोशा शशंस तत् । अचिन्त्यं गुणशीलानां चरितं कुलयोषिताम् । इति चाभिननन्दुस्तामुपकोशां सभास
दः । ततस्ते हृतसर्वस्वाः परदार्थिनः खलाः । राज्ञा निर्वासिता देशादशीलं कस्य भूतये । भगिनी मे त्वमित्युक्त्वा दत्त्वा प्रीत्या धनं बहु । उपकोशापि भूपेन प्र॰
षिता गृहमागमत् । वर्षोपवर्षौ तद्बुद्ध्वा साध्वीं तामभ्यनन्दताम् । सर्वश्च विस्मयस्मेरः पुरे तत्राभवज्जनः । अत्रान्तरे तुषाराद्रौ कृत्वातीव्रतरं तपः । आराधि राम
तो मया देवो वरदः पार्वतीपतिः । तेनैव तेन शास्त्रं मे पाणिनीयं प्रकाशितम् । तदिच्छानुग्रहादेव मया पूर्णीकृतं च तत् । ततोऽहं गृहमागच्छमज्ञाताध्वप ८

© Dharmartha Trust J&K. Digitized by eGangotri

रिश्रमः निशाकरकलामौलिप्रसादासादितनिर्भरः अथ मातुर्गुरूणांच कृतपादाभिवंदनः तत्रोपकोशावृत्तांतं तमश्रौषं महाद्भुतम् तेन मे परमां भूमिमात्म
मानंदविस्मयौ तस्यांच सहजस्नेहबहुमानावगच्छताम् वर्षोथमत्मुखादैच्छच्छ्रोतुंव्याकरणं नवम् ततः प्रकाशितः स्वामिकुमारेणैव तस्य तत् ततो
व्याडीन्द्रदत्ताभ्यां विज्ञप्तो दक्षिणां प्रति गुरुर्वर्षोब्रवीत्स्वर्णकोटिर्मे दीयतामिति अंगीकृत्य स गुर्वर्थं तौ च मामिदवोचताम् एहि राज्ञः सखे
नंदाद्याचितुं गुरुदक्षिणाम् गच्छामो नान्यतोस्माभिरियत्कांचनमाप्यते नवाधिकाया नवतेः कोटीनामधिपो हि सः वाचा तेनोपकोशा च प्राग्ध
र्मभगिनी कृता अतः स्यालः सते किंचित्स्वगुणैः समवाप्यते इति निश्चित्य नंदस्य कटकं नृपतेर्वयम् अयोध्यायां गतास्तत्र त्रयः सब्रह्मचारिणः
प्राप्तमात्रेषु चास्मासु स राजा पंचतां गतः राष्ट्रे कोलाहले जाते विषादेन सहैव नः अवोचदिंद्रदत्तोथ तत्क्षणं योगसिद्धिमान् गतासोरस्य भूपस्य
शरीरं प्रविशाम्यहम् अर्थी वररुचिर्मेस्तु दास्याम्यस्मै च कांचनम् व्याडी रक्षतु मे देहं तत्र प्रत्यागमावधि इत्युक्त्वा नंददेहांतरिंद्रदत्तः समाविशत्
प्रत्युज्जीवति भूपे च राष्ट्रे तत्रोत्सवोभवत् शून्ये देवगृहे देहमिंद्रदत्तस्य रक्षितुम् व्याडौ स्थिते गतोभूवमहं राजकुलं तदा प्रविश्य च स्वस्तिकारं विधा
य गुरुदक्षिणाम् योगनंदो मया तत्र हेमकोटिं स याचितः ततः स शकटालाख्यमसौ नंदस्य मंत्रिणम् सुवर्णकोटिमेतस्मै दापयेति समादिशत्
मृतस्य जीवितं दृष्ट्वा सद्यः प्राप्तिमर्थिनः जन्तत्वं ज्ञातवान्मंत्री किमज्ञेयं हि धीमताम् देव दीयत इत्युक्त्वा स मंत्री स्वचिंतयत् नंदस्य तनयो बालो रा
ज्यं च बहुशत्रवः तत्संप्रत्यवरक्षामि तस्य देहमपीदृशम् निश्चित्यैतत्तत्कालं सर्वान्शवानदाहयत् चारैरन्विष्य तन्मध्ये लब्ध्वा देवगृहात्ततः व्या
डिं विधूय तद्दग्धमिंद्रदत्तकलेवरम् अत्रांतरे च राजानं हेमकोटिसमर्पणे त्वरमाणमथस्माह शकटालो विचारयन् उत्सवाक्षिप्तचित्तोयं सर्वःप

© Dharmartha Trust J&K. Digitized by eGangotri

क.स.१ द्विजन्मः स्थितः स्मां प्रती त्यनामथविप्रोपावद्दराम्यहम् । अथैष स योगनंदस्य आदिनाङ्केदितं पुरः । अत्र ब्रह्मणमनुक्रान्तजीवोयोगस्थितो द्विजः । अनाथश वररुस
६ घवलाद्दत्तवोद्दृये तच्छ्रुत्वा योगनंदस्य काप्यवस्थाभवत्तदा । देहदाहास्थिरे जस्मिन्नज्ञाने निर्गमिष्यमे रहो मुवर्णकोटिं स ततः शकटालो महामतिः । योगनंदो द्विध
9 विजनेम शोको आडिमब्रवीत् । शूद्रीभूतोस्मि विप्रोपि कीं श्रिया स्थिरयापि मे तच्छ्रुत्वाश्वास्य तं व्याडिः कालोचितमभाषत ज्ञातोसि शकटालेन तदेवं चिंतया
धुना महामंत्री स्वयं स्वेच्छमचिरात्त्वां विनाशयेत् पूर्वनंदसुतं कुर्याच्चंद्रगुप्तं हि भूमिपम् तस्माद्धररुचिं शीघ्रं मंत्रित्वे कुरु येन ते एतद्बुध्या भवेद्राज्यं स्थिरं दिव्यानु
भावया इत्युक्त्वव्रतेव्याडौ रक्षां तां गुरुदक्षिणाम् तदेवानीय मद्दत्वा योगनंदेन मंत्रिता अथोक्तः स मया राजा ब्राह्मणपदहारितेपि ते एकनैव स्थिरमन्ये शक
टालेपदे स्थिते तस्मात्प्रशमयत्नेन मितिमंत्रेमयोदिते योगनंदोंधकूपांतः शकटालं तमक्षिपत् किं च पुत्रशतं तस्य तत्रैव विविशवानसौ जीवद्भिर्नामुनारुध्यद्
तिदोषानुकीर्तनात् एकः शरावः सक्तूनामेकः प्रत्यहमंभसः शकटालस्य तत्रांतः सपुत्रस्य अघीयत सचोवाचततः पुत्रानमी भिः सुताः एकोपि कृच्छ्राद्द्धर्तन
घसांनुकर्त्येवका तस्मात्तं भक्षयत्वकः प्रत्यहं सजलानयन् यः शक्तोयोगनंदस्य कर्तुं वैर प्रतिक्रियाम् त्वमेवशक्तो भुंक्ष्वेत दितिपुत्रास्तमब्रुवन् प्राणेभ्योपि
हि धीराणां प्रिया शत्रुप्रतिक्रिया ततः स शकटालस्तैः प्रत्यहं सक्तुवारिभिः एक एवाकरोद्वृत्तिं कष्टं क्रूरा जिगीषवः अबुध्यात् क्लिन्नमप्राप्य विम्बं भंश्रम विलुप्य
तस्वेलुंब्य वहर्तव्यमात्मनोभूतिमिच्छता इतिवा चिंतयत्तोपश शकटालोंधकूपगतः तन्नयांतान्क्षुधार्तानां पश्यन्प्राणोद्गमव्यथाम् ततः सुतशतं तस्य पश्यतस्त
ध्यपद्यत तत्कंकालैर्वृतो जीवंस्तिष्ठत्सचकेवलः योगनंदश्च सामाज्ये बद्धमूलो भवत्ततः आडिरभ्यायथौतं च गुरुवे दत्तदक्षिणः अभीसैव च सोवादीद्विरं राज्यं समस्तव राम
स्तु ते अमं त्रितोसि गच्छामि तपः कर्तुमहं प्रचित् तच्छ्रुत्वा योगनंदस्तं वाष्पकंठोभ्यभाषत राज्येमे भुंक्ष्व भोगांस्त्वं मुक्त्वा मां मा स्म गा इति व्याडिस्ततोब्रवीद्राजन्श ८

© Dharmartha Trust J&K. Digitized by eGangotri

गीरेकृणनश्वरेएवंप्रोयघमरिबुधीरः कोनाममसज्जति नहिमोहयतिप्राज्ञंलक्ष्मीमरुमरीचिवत् इत्युक्त्वैवमतनतत्कालंतपसेनिश्चितोययौ अगमच्चयोग
नंदः पाटलिपुत्रंस्वराज्यनगरंसमः भोगायकालेनाभूयस्तहितः सकलंसेव्यवृत्तः तत्रोपकोशापरिचर्यमाणः समुद्वहन्मन्त्रिधुरांचतस्य अहंजनन्यागुरुभिश्च
सार्धमासमाघलक्ष्मीमवसंचिराय वहुतत्रदिनेदिनेघृसिंधुः कनकंमह्यमदात्तयः श्रमसन्ना वहतिस्मशरीरिणीचसाज्ञात्वाममकार्याणिसरस्वतीसेव इतिश्री
मद्सोमदेवविरचितेकथासरित्सागरेकथापीठलंबकेचतुर्थस्तरंगः एवमुक्त्वावररुचिः पुनरन्यद्वर्णयत् कालेनयोगनंदोयकामादिवशयायपो गजेंद्र इवमत्तः
सन्नापेक्षतचकिंचन अकांडपातोपनताकंहिलक्ष्मीर्नमोहयेत् अचिंतयंततश्चाहंराजात्तावद्विशृंखलः तत्कार्यचिंतयाक्रांतः स्वधर्मोमेवसीदति तस्माद्
रंसहायंतंशकटालंसमुद्धरे क्षिपत्येवहिस्वंविचिंसत्कुर्यान्मयिस्थिते निश्चित्यैतन्मयाप्रार्थ्यराजानंसोऽन्धकूपतः उद्धृतःशकटालोथमद्वाक्याद्विजातयः दुर्जयो
योगनंदोयंस्थितेवररुचावतः आश्रयेयैवतमीवृत्तिंकालंतावत्सनीतिमुज्झितुम् इतिसचिंतयन्प्राज्ञः शकटालोमदिच्छया अकरोद्राजकार्याणिपुनःसंप्राप्यमंत्रिताम्
कदाचिद्योगनंदोयनिर्गतोनगराद्बहिः स्थितपंचांगुलिंहस्तंगंगामध्येव्यलोकयत् किमेतदितिमापृच्छमापहसत्तत्क्षणात् अहंचद्वेनिजांगुल्यौदिशितस्यामद
र्शयम् तेनतस्मिंस्तिरोभूतेहस्तेराजातिविस्मयात् भूयोपितद्पृच्छन्मांततश्चाहंतमब्रुवम् पंचभिर्मिलितैःकिंयज्जगतीहनसाध्यते इत्युक्त्वावानसौहस्तः स्वांगुली
ःपंचदर्शयन् ततोस्यराजन्नंगुल्यावेतेद्वेदर्शितेतदा ऐकचित्त्येद्वयोरेवकिमसाध्यंभवेदिति इत्युक्तेगूढविज्ञानिसमतुष्यत्ततोनृपः शकटालोमश्यीदन्मद्बुद्धिं
वीक्ष्यदुर्जयाम् एकदायोगनंदश्चददृशवान्महिषींनिजाम् वातायनायास्पृच्छंतींब्राह्मणातिथिमुन्मुखम् तन्मात्रादेवकुपितोराजाविप्रस्यतस्यसः आदिदेशवधम्
र्याद्धिविवेकपरिपंथिनी हंतुंवध्यभुवंतस्मिन्नीयमानेद्विजेतथा अहसन्मृतजीवोपिमत्स्योविपणिमध्यगः तदैवराजातद्बुद्ध्वावधंतस्यन्यवारयत् विप्रस्यमामपृच्छ

© Dharmartha Trust J&K. Digitized by eGangotri

क. स. १
१०
10



ञ्च मत्स्यहासस्य कारणम् निश्यपृच्छथ पार्श्वे न देवी मुक्त्वा निर्गतं च माम् चिंतितोपस्थिते कांतसरस्वत्येवमब्रवीत् अस्य तालतरोः पृष्टे तिष्ठ रात्राववलक्षितः तत्रैश्रो
ष्यसि मत्स्यस्य हास्यहेतुमसंशयम् तच्छ्रुत्वा निशि तत्राह्यातालतालोपरि स्थितः अपश्यं राक्षसीं घोरां बालपुत्रैः सहागताम् सा भक्ष्यं याचमानांस्तानवादीत्प्रति
पाल्यताम् प्रातर्वो विप्रमांसानि दास्याम्यद्य स नो हतः कस्मान्नमहतोद्येति पृष्टा तैः साब्रवीत्सुताः तं हि दृष्ट्वा मृतोपीह मत्स्योहसितवानिति हसितं किमु तेनेति
पृष्टा भूयः सुतैश्च सा अवोचद्राक्षसी राज्ञः सर्वा राज्ञ्योपि विप्लुताः सर्वत्रान्तःपुरेस्य स्त्रीरूपाः पुरुषाः स्थिताः हन्यतेऽनपराधस्तु विप्र इत्यहसत्तिमिः भूतानां पार्थि
वानामत्र निर्विवेकत्वहासिनाम् संवर्तश्चारिणास्वेता भवंत्येवं च विक्रियाः एतत्तस्या वचः श्रुत्वा ततोपक्रांतवानहम् प्रातश्च मत्स्यहासस्य हेतुं राज्ञे न्यवेदयत्
प्राप्य चांतःपुरे स्त्रीरूपान्पुरुषांस्तदा बद्धमन्यत मां राजा वध्याद्विप्रं च मुक्तवान् इत्यादिचेष्टितं दृष्ट्वा तस्य राज्ञो विशृंखलम् खिन्ने मयि कदाचिच्च तत्रागाच्चि
त्रकृन्नवः अलिखच्च महादेवीं योगनन्दं च तं पटे सजीवमिव चित्रं तद्वाक्चेष्टारहितं त्वभूत् तं च चित्रकरं राजा तुष्टो वित्तैरपूरयत् तं च वासगृहे चित्रपटं भित्तावका
रयत् एकदा च प्रविष्टस्य वासके तत्र सा मम अपूर्णलक्षणा देवी प्रतिभाति भाति स्म चित्रेण लक्षणांतरसंबंधादस्मत्प्रतिभावशात् अथाकार्यमहं तस्यास्तिल
कं मेखलापदे संपूर्णलक्षणां तेन कृत्वैवागतवानहम् प्रविष्टो योगनंदोथ तिलकं चाप्यलोकयत् केनापरं चितोत्रेति सोपृच्छन्महत्तरान् ते च न्यवेदयंस्तस्यै कर्ता
रं तिलकस्य माम् देव्या गुप्तप्रदेशस्थमिमं नान्यो मया विना वेत्ति तज्ज्ञातवानेवमसौ वररुचिः कथम् छन्नः कृतोस्तु नानेन ममांतःपुरविप्लवः दृष्टवानत एवायं
स्त्रीरूपांस्तत्र तान्नरान् इति संचिंतयामास योगनंदः क्रुधा ज्वलन् जायंते बत मूढानां संवादा अपि तादृशाः ततः स्वैरं समाहूय शकटालं समादिशत् त्वया व	रा म.
ररुचिर्वध्यो देवीविध्वंसनादिति यथाज्ञापयसीत्युक्त्वा शकटालोगमद्गृहम् अवितथस्तु शक्तिः स्याद्धंतुं वररुचिं न मे दिव्यबुद्धिप्रभावोसावुत्पन्ना च ममापदः	१०

विप्रश्च तद्वरं गुप्तं मम प्रत्याख्याकरोमि तत् इति निश्चित्य सोनेभ्येस राज्यकोपमकारणमेव घातं कथयित्वा मे शकटालोऽब्रवीत्ततः अमं वं विसंवादाय ह
न्म हं त्वं च मद्गृहे प्रच्छन्नस्तिष्ठ मा मस्मात् किं तु कोपं न भावयात् इति तद्वचनाच्छन्नस्तद्गृहे च स्थितोऽभवत् मत्वा मं हत वाध्यं चिन्म द्धारव्यानपे निशि ए
वं पुत्र पुत्रकेनातिन प्रीमावोचमहं तदा एको मे न्नामभवा मेन दं तु मां नक्तं तामतिः । वहिं हं तु मेहं शक्तो राज्ञो मो मित्रं वै माविमे ख्यातमा आगतो विश्व ग्रसते स्म
दि छगराजात्वि हेहृन्तास्यः स च वव धागनमे छिजः तच्छ्रुत्वा सोऽब्रवीन्मंत्रा अ स्त्रामरक्ष्पेनामिति ततो ध्यानागवं तस्मे न तद् ज्ञोहमदर्शयम् तद्दर्शनाच्च विच
स्तो विस्मितश्च बभूव सः तत्कस्मै तदितिन स्मिन् शकटालः स मां पुनः कथं निराज्ञो मो मित्रं सं जातः इति पृष्टवान् अतोहमवदं पूर्वं राज्ञोऽयं नगरे धमन्
रात्रौ राज्ञो नृपं भ्रायरैकेको नगराधिपतच्छ्रुत्वा योगनदो मामकरोन्नगराधिपम् अमं स्थापरूपमत्राहं भ्रमतेराज्ञमनिशि सवमामचरद्वृद्धि विषतेन
गरेन्न कामुत्रपान्नीतितच्छ्रुत्वा विहस्याहं तमवृधम् पायस्यामि मतामृस्वर्पमुत्रपातस्य साभवेत् तच्छ्रुत्वैव तत्वर्पेकेनजितो स्मीमवरत्समाम् अत्र मे
ज्ञाद्वधोत्ता रां मां पुनश्च अब्रवीः सो तुष्टोस्मि ते मुद्वेत्वम सन्निधास्ये च ततस्पतः इसु स्कांतर्ई तितन स्मिमयागतमगाम त्वम् एवमापत्सहायो मे राज्ञो
मित्रतां गतः इस्युक्तवानहं भूपः शाकपलेन चार्थितः अंगामदर्शपं तस्मै मूर्तो ध्यानाद्युपस्थितां सत्र निमित्तो घितामा सा च ममपार्श्वाति रोद बन्टवश
कपलश्च महायः प्रणतो ममपि एकदा च समंत्रा मां गुप्तस्थं स्विग्रमब्रवीत् सर्वं जेनापि खेदाय किमात्मा दूपते त्वया किं न जानासि यद्राज्ञामवि
चारतमा धिपः अचिराद्भवेत्छद्रत्या चैतां कथा शृणु आदित्यवर्मनामात्र बभूवन्तपतिः पुरा शिववर्माभिधानोस्य मंत्री चाभून्महामति राज्ञस्त
स्मैकदा चैकाराज्ञी मैंगेमधारयत तद्देधासन्रपोपछदिसंतः पुरं रक्षिणः वषहपं प्रविष्टस्यनुर्ततेततः पुस्यमे तदेषा गर्भसंभूतिः कुतः सपतिकथ्यः

© Dharmartha Trust J&K. Digitized by eGangotri

पं.त.१ नाम् अथोक्तेप्रवेशोऽत्रपुंसोऽस्यानघ्रभो शिववर्मानुतेमन्त्रीप्रविशस्य निवारितः तच्छ्रुत्वाचिंतयद्राजा नूनंद्रोहीमएवमे प्रकाशंचहतेतस्मिन्नपवादो
११ मवेन्मम इत्सालोच्यसतपुत्राशिववर्मणामाश्वरः सामंतस्यातिकंसरक्षः प्राहिणोद्भोगवर्मणः तद्वधंतस्यलेखेनमंदिश्यतदनंतरम् निगूढंस-
त्पसत्रलेखहारंव्यसर्जयत् यातेमंत्रिणिसमाहेगतेभीत्यापलायिता सारातानरक्षिभितंप्रापुंसाम्राऽपिणासह आदित्यवमानदुधासानुता-
पोभवत्तदा किंमयाताहृशोमंत्रीघातितोकारणादिति अत्रांतरेसवप्रापर्नीकृतंभोगवर्मणः शिववर्मासचोपायाश्चेस्वमाद्दापदक्षैः वाचयित्वा-
वृत्तेसरवमेकांतेशिवधर्मणे शशंसवधनिर्देशंभोगवर्माविधेर्वशात् शिववर्मामवोचत्वत्रंसामंतंमंत्रिमत्तमः आपादयत्वंमांनोचेद्धिहस्यासमा-
नमात्मना तच्छ्रुत्वाविस्मयाविष्टोभोगवर्माजगादतम् किमेतद्धिमेविप्रशपितोसिनवक्तिचेत् अथवक्तिस्मतंमन्त्रीहम्मेहंयत्रभूपते जन्महा
दशवर्षाणिदेशेदेवोनवर्षतितच्छ्रुत्वामंत्रिभिस्यर्धंभोगवर्मात्मचिंतयत् दुष्टः सराजादेशस्यनाशमस्माकमिच्छति किंहितत्रनसंसेवधकागुस
गामिनः तस्मान्मंत्रीनवध्योसोराज्ञः स्वात्मवदप्यपम् इतिसंमंत्र्यदत्वाचरक्षकान्भोगवर्मणा शिववर्मातनोदेशात्प्रेषितोभूत्तजः स्वराणात् ए
वंप्रसापयोजीवत्समंत्रीप्रहतपाप्मया शुद्धिश्वास्यान्यतोजातानदिधर्मोन्यथाभवेत् इत्यंतोवापिशुद्धिः स्यान्निश्चितावहद्धेमम कसायनत्पोप्य
सानुतापोभविष्यसि इत्युक्तः शकटालेनतच्छ्रुत्वाहंतस्यवेश्मति प्रतीक्षमाणोवमसंतामहाम्यतिवाहयम् तस्याथयोगनंदस्यकाणाभूत्तेकदावन पु
त्रोहिरण्यगुप्ताख्योमृगयायैगतोभवत् अश्ववेगात्सयातस्मकृपंचिदरमंतरम् एकाकिनोवनेतस्यवासरः पर्यहीयत ततश्चतानिशांनेतुरक्षमाराहति राम
ससः क्रमाणात्तेवंचारोहद्वक्ः सिंहेनभीषितः सदृस्याराजपुत्रेतंभीतमानुषभाषया माभैषीर्ममित्रंत्वमित्युक्त्वानिर्भयंव्यधात् विस्रंभादुक्त्वाकेनराजपु ११

© Dharmartha Trust J&K. Digitized by eGangotri

त्रोयमुक्तवान् अहंत्वज्जाग्रद्देवासीद्यः सिंहोयमसोऽब्रवीत् अहंमानुषमेतंमेक्षिपपावद्दाम्यहम् अहंत्वत्तोब्रवीत्तापनमित्रंधातपाम्यहम् कुमारे
प्रसुप्तेषुराजपुत्रेचजाग्रति पुनःसिंहोयमसौब्रवीत्देह्येनंमेक्षिपमानुषं तच्छ्रुत्वात्मभयात्तेनसिंहस्यराघनायसःक्षिप्तोपिनापतच्छिन्नमस्तकोदेवप्रबोधि
तःमित्रद्रोहिन्यवोम्यत्वंइतिशापमराश्रुतः तस्यराजसुतस्यैतद्वचांनावेगमावधिम् प्राप्यैवसगरदेशातन्मयत्तोऽत्रपात्मजःपोगमंदश्चनदृत्वाविषादंस
ह्मागमत् अब्रवीच्चमत्कालेस्मिन्जीवेद्वररुचिर्यदि इदंज्ञायेततत्सर्वधिज्ञात्तद्वयथाटवम् तच्छ्रुत्वावचनंराज्ञःशकटालोव्यचिंतयत् हंतकासापनस्या
यंलघःकालःप्रकाशने नसोऽत्रमानीतिश्चत्वरामेजोपिचविश्वसेत् इत्यालोच्यसराजानमब्रवीद्याचिताभयःराजन्नलंविषादेनजीवत्त्वररुचिःस्थितःयोग
नंदस्वनोवादीदुतमानीयतामिति अथाहंशकटालेनयोगनंदांतिकंहरान्अनीतस्तंतथाभूतंराजपुत्रंव्यलोकयम् मित्रद्रोहःकृतस्तेनदेवसुस्नातेथैव
सःसरस्वतीप्रसादेनवृत्तांतःकथितोमयाततोराजसुतःशापमुक्तेनव्चुतमेराजसूनुना त्वयाकथमिदंज्ञातमित्यपृच्छत्सभूपतिः अथाहमवदंराजन्लक्षणैरनुमान
तःप्रतिभातश्चपश्यंतिसर्वमनावतांधियःतथ्याजितिलोकज्ञातत्तथासर्वमिदंमया इतिमद्वचवात्सोभूद्राजालज्जानुतापवान् अथानादृतसत्कारःपरिशु
द्धैवलाभवान् स्वगृहंगतवानस्मिशीलंहिविदुषांधनम् प्राप्तस्यैवचतत्रमेजनोवारास्वतोमम अभ्येसमोमसुड्डांतमुपवर्षोब्रवीत्ततःराज्ञाहतंनिशम्यत्वा
मुपकोशाग्निमादृशः अकरोद्द्यमातुस्तेमुवाहृदयमस्फुटत् तच्छ्रुत्वाभिनवोद्भूतशोकवेगविचेतनःमयोहमपतंभूमौवातनरुग्णाद्रुमःक्षणाच्चगतवानस्मि
प्रलापानांरमज्ञत्यादिभिरुपागसर्वैषणावचैनेरहम् प्रोधितोयपयात्त्वंकथंचिद्धतिमासवान् नतिविरक्तहृदयस्यक्कोमर्वविवंधनम् प्रशमैकसहायाहं
तपोवनमशिश्रियम् दिवसेयगच्छत्सुतत्तपोवनमकरा अपोध्यातउपागच्छद्द्विप्रएकोमपिस्थिते समयायोगनंदस्यराज्यवार्त्तामपृच्छतप्रसभिज्ञायमांसो।

© Dharmartha Trust J&K. Digitized by eGangotri

ष.क.१ यतशोकमिदमब्रवीत् शृणु वंदस्य पद्धतिं तत्सकाशाद्गुणेष्वपि लब्धावकाशस्तस्याभूच्छकटालस्थिरेणतः संचिंतयन्नधोपायं योगनंदस्य युक्तितः क्षितिं
१२ खनंतमद्राक्षीच्चाणिक्याख्यं द्विजं पथि किं भुवं खनसीत्युक्तस्तेन स श्रोघ सोऽब्रवीत् दर्भमुन्मूलयाम्यत्र पादोऽसेवि तेन मे कृतः तच्छ्रुत्वा सहसा मंत्री कोपनक्रूर
12 निश्चयम् तं विप्रं योगनंदस्य वधोपायममन्यत नाम पृष्ट्वाब्रवीत्तं च हे ब्रह्मन्स्थापयामि ते त्रयोदश्यां गृहे नंदस्य भूपतेः दक्षिणातः सुवर्णस्य ल
क्षं तव भविष्यति भोक्ष्यसे धुरि चान्येषामेहि द्विजा वह गृहं मम इत्युक्त्वा शकटालस्तं चाणिक्यमनयद्गृहम् श्राद्धाहे दर्शयज्जं च राज्ञे स ब्राह्मणं च तम् ततः सग
त्वा चाणिक्यो धुर्यासने उपाविशत् सुबंधुर्नामा विप्रश्च तामैच्छद्धुरमात्मनः तद्गत्वा शकटालेन विज्ञप्तो नंदभूपतिः नावादीन्नापरो योग्यः सुबंधुर्धुरि
तिष्ठतु आगत्य ताच राज्ञाज्ञां शकटालो भयान्ततः न मेऽपराध इत्युक्त्वा चाणिक्याय न्यवेदयत् सोऽथ कोपेन चाणिक्यो ज्वलन्निव समंततः निजां मुक्त्वा शिखां
तत्र प्रतिज्ञामकरोदिमां अवश्यं हंत नंदोऽयं सप्तभिर्दिवसैर्मया विनाश्यो बंधनीया च ततो निर्मन्युना शिखा इत्युक्तवंतं कुपितं योगनंदे पलायितम् अल
क्षितं तं स्वगृहे शकटालो न्यवेशयत् तत्रोपकरणैर्दत्तैर्गुप्तस्तेनैव मंत्रिणा स चाणिक्यो द्विजः क्वापि गत्वा कृत्यामसाधयत् तद्वशाद्योगनंदोऽथ दाहज्व
रमवाप सः सप्तमे दिवसे प्राप्ते पंचत्वं समुपागमत् हत्वा हिरण्यगुप्तं च शकटालेन तत्सुतम् पूर्वनंदसुते लक्ष्मीश्चंद्रगुप्ते निवेशिता मंत्रित्वे तस्य चाभ्यर्थ्
बृहस्पतिसमं धिया चाणिक्यं स्थापयित्वा तं स मंत्री कृतकृत्यताम् मत्वा नो योगनंदस्य कृतवैरप्रतिक्रियः पुत्रशोकेन निर्विण्णस्तद्विनाशाय पोवनम्
इति तस्य मुखाच्छ्रुत्वा विप्रस्य सुतरामहम् काणभूते गतः खेदं सर्वमालोक्य चंचलम् खेदाच्चाहमिमां द्रष्टुमागतो विंध्यवासिनीम् तत्प्रसादेन दृष्ट्वा त्वां राम.
स्मृता जातिर्मया सखे दिव्यं प्राप्तं च विज्ञानं मयोक्ता ते महाकथा इदानीं क्षीणशापोऽहं यतिष्ये देहमुक्तितम् त्वं च संप्रति तिष्ठेह यावदायाति ते निकम् शि १२

© Dharmartha Trust J&K. Digitized by eGangotri

प्रयुक्तो गुणाढ्यस्त्यक्तभाषात्रयो द्विजः सोपि त्वमिव क्रोधाद्धि मया शप्तो गुणोत्तमः माल्यवान्नाम मत्पक्षपातान्मर्त्यत्वमागतः तस्मै महेश्वरोक्तेयं कथनीया
कथा त्वया ततस्ते शापनिर्मुक्तिस्तस्य चापि भविष्यति एवं वररुचिस्तत्र काणभूते निवेद्य सः प्रतस्थे देहमोक्षाय पुण्यं बदरिकाश्रमम् गच्छन्ददर्श गंगा
यां सोथ शाकाशनं मुनिम् तत्समक्षं च तस्यर्षेः कुशेनाभूत्करक्षतिः तेनास्य रुधिरं निर्यत्तेन शाकरसीकृतम् अहंकारपरीक्षार्थं कौतुकात्स्वप्रभावतः त
द्दृष्ट्वाहं सिद्धोस्मीत्यगाद्दर्पमसौ मुनिः ततो वररुचिस्तस्य प्रहस्यैव जगाद तम् जिज्ञासनाय रक्तं ते मया शाकरसीकृतम् यावन्नाद्याप्यहंकारः परित्यक्त
स्त्वया मुने ज्ञानमार्गे प्यहंकारः परिघो दुरतिक्रमः ज्ञानं विना च नास्त्येव मोक्षो व्रतशतैरपि स्वर्गस्तु न मुमुक्षूणां क्षयी चित्तं विलोभयेत् तस्मादहंकृ
तित्यागाज्ज्ञाने यत्नं मुने कुरु विनीयैवं मुनिं तेन प्रणतेन वररुचिः तं वेद्याश्रमोद्देशं शांतो वररुचिर्ययौ अथ स निविडभक्त्या तत्र देवीं शरण्यां श
रणमुपगतो सो मर्त्यभावं मुमुक्षुः प्रकटितनिजमूर्त्तिः सापि तस्मै शशंस स्वदहनसमुत्थां धारणां देहमुक्त्यै दग्धशरीरमथ धारणयानया तद्दि
व्यां गतिं वररुचिः स निजां प्रपेदे विंध्याटवीभुवि जनः स च काणभूतिरासीदभीप्सितगुणाढ्यसमागमोत्कः इति श्रीभट्टसोमदेवविरचिते कथास
रित्सागरे कथापीठलंबके पंचमस्तरंगः ततः स मर्त्यवपुषा माल्यवान्विचरन्वने नाम्ना गुणाढ्यः सेवित्वा सातवाहनभूपतिम् संस्कृताद्यास्तदग्रे च भाषा
स्तिस्रः प्रतिज्ञया त्यक्त्वा खिन्नमना द्रष्टुमाययौ विंध्यवासिनीम् तदादेशेन गत्वा च काणभूतिं ददर्श सः ततो जातिं निजां स्मृत्वा प्रबुद्धः सहसाभवत्
स्वाश्रिसंभाषां पैशाचीं भाषात्रयविलक्षणाम् श्रावयित्वा निजं नाम काणभूतिं च सोब्रवीत् पुष्पदंतात्श्रुतां दिव्यां शीघ्रं कथय मे कथाम् येन शापं त
रिष्यावस्त्वं चाहं च समं सखे तच्छ्रुत्वा प्रणतो हृष्टः काणभूतिरुवाच तम् कथयामि कथां किंतु कौतुकं मे महत्प्रभो आजन्मचरितं तावच्छंस मे कुर्वनुग्रहम्

© Dharmartha Trust J&K. Digitized by eGangotri

ह.कं.१ इतितेनार्थितोवक्तुंगुणाढ्योथप्रचक्रमे प्रतिष्ठानेस्तिनगरंसुप्रतिष्ठितसंततम् तत्राभूत्सोमशर्माख्यःकोपिब्राह्मणसत्तमःवत्सश्चगुल्मकश्चै
१२ वद्वौतस्यतनयौसखे जायतेस्मतृतीयाचश्रुतार्थानामकन्यका कालेनब्राह्मणःसोथसभार्यःपंचतांगतः ~~वितस्यामानेसेनचनमवत पापसं~~त
13 तःतस्युद्वौतौस्वसारंचपालयंतावतिष्ठताम् साचाकस्मात्तस्यगर्भाभूत्तद्दृष्ट्वावत्सगुल्मयोः तत्रान्यपुरुषाभावाच्छंकान्योन्यमजायत ततःश्रुतार्था
वित्तज्ञाभ्रातरौतावभाषत पापशंकेनांकर्तव्यमश्रृणुतकथयामिवाम् कुमारःकीर्तिसेनाख्योनागराजस्यवासुकेःभ्रातःपुत्रोस्तितेनाहंस्नाना।
तुंगतासती ततःसमदनक्रांतोनोनिवेद्यान्वयनाममनीगांधर्वेणविवाहेनमांभार्यामकरोत्तदा विप्रजातेरयंतस्मान्ममगर्भइतिस्वसुःश्रुत्वावाकःप्र
भा सयोक्तेतिवत्सगुल्मावैषाताम् ततोरहसितस्मारस्मातंनागकुमारकम् सतमागतःसोथवत्सगुल्मावभाषत भार्याकृतामपैवेयशाप
भ्रष्टावराप्सराःयुष्मत्स्वसायुवांचेहशापेनवच्युतौभुवि पुत्रोजनिष्यतेचात्रयुष्मत्स्वसुरसंशयम् ततोस्याःशापनिर्मुक्तिर्युवयोश्चभविष्यति
इत्युक्त्वांतर्हितःसोभूत्ततःस्तोकेश्चवासरैः श्रुतार्थायाःसुतोजातस्तंद्विजानीहिमांसखे गुणाढ्यजातोयंगुणाढ्योनामब्राह्मणः इतिश्रुत्वास्तुद
भूदतंरि क्षात्तरत्वतोञ्छाशायास्ततस्तेजननीमातुलोमम कालेनपंचतांप्राप्तागौतमश्चाहमधीरताम् अथशोकंसमुत्सृज्यबालोपिगत
वानहम् स्वावष्टंभेनविद्यानांप्राप्तयेदक्षिणापथम् कालेनतत्रसंप्राप्यसर्वविद्याःप्रसिद्धिमान् स्वदेशमागतोभूवंदर्शयिष्यन्निजान्गुणान्
प्रविशंश्चचिरात्तत्रनगरेसुप्रतिष्ठिते अपश्यंशिष्यसहितःशोभांकामप्यहंतदा क्वचित्सामानिच्छंदोगगायंतिस्मयथाविधि क्वचिद्विवादोविप्रा राम
णामभूद्दृष्टविनिर्णये योद्यूतकलावित्तेनमस्यहस्तगतोनिधिः इत्यादिकितवैर्धूतमस्तकवल्गितवाःक्वचित् अन्योन्यनिजवाणिज्यकलाकौशलवा १२

© Dharmartha Trust J&K. Digitized by eGangotri

रिताम् एकविंशवणिजां मध्ये वणिगेकोऽब्रवीदिदम् अर्थैः संचयवानर्थान्प्राप्नोति कियदद्भुतम् मया पुनर्विनैवार्थं लक्ष्मीरासादिता पुरा गर्भस्थस्य च
मे पूर्वं पिता पंचत्वमागतः मन्मातुश्च ततः पापैर्गोत्रजैः सकलं हृतं ततः सा तद्भयाद्गत्वा रक्षंती गर्भमात्मनः तस्थौ कुमारदत्तस्य पितुर्मित्रस्य वेश्म
नि तत्र तस्याश्च जातोऽहं साध्व्या वृत्तिनिबंधनम् ततश्चावर्धयत्सा मां कृच्छ्रकर्माणि कुर्वती उपाध्यायमयाच्यत तया किंचित्प्रदानया क्रमेण शि
क्षितश्चाहं लिपिं गणितमेव च वणिक्पुत्रोऽसि तत्पुत्र वाणिज्यं कुरु सांप्रतम् विशाखिलाख्यो देशेऽस्मिन्वणिक्चास्ति महाधनः दरिद्राणां कुलीनानां भांडमू
ल्यं ददाति सः गच्छ याचस्व तं मूल्यमिति माताब्रवीच्च माम् ततोऽहमगमं तस्य सकाशं सोऽपि तत्क्षणम् इत्यमूं स वोचत्क्रुधा कंचिद्वणिक्पुत्रं विशाखिलः मूषः
कोऽदृश्यते योऽयं गतप्राणोऽत्र भूतले एतेनापि हि पण्येन कुशलो धनमर्जयेत् दत्तास्तव पुनः पापदीनारा बहवो मया दूरे तिष्ठतु तद्वृद्धिस्त्वया तेऽपि न रक्षिताः
तच्छ्रुत्वा सहसैवाहं तमवोचं विशाखिलम् गृहीतोऽयं मया त्वत्तो भांडमूल्याय मूषकः इत्युक्त्वा मूषकं हस्ते गृहीत्वा संपुटे च तम् लिखित्वास्य गतोऽभूव
महं सोऽप्यहसद्वणिक् चणकांजलियुग्मेन मूल्येन स च मूषकः मार्जारस्य कृते दत्तः कस्यचिद्वणिजो मया कृत्वा तांश्चणकान्भृष्टान्गृहीत्वा जलकुंभि
काम् अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः तत्र श्रांतागतायांभः शीतलं चणकांश्च तान् काष्ठभारिकसंघाय सप्रश्रयमदामहम् एकैकः काष्ठि
कः प्रीत्या काष्ठे द्वे द्वे ददौ मम विक्रीतवानहं तानि नीत्वा काष्ठानि चापणे ततः स्तोकेन मूल्येन क्रीत्वा तांश्चणकांस्ततः तथैव काष्ठिकेभ्योऽहमन्येद्युः का
ष्ठमाहरम् एवं प्रतिदिनं कृत्वा प्राप्य मूल्यं क्रमान्मया काष्ठिकेभ्योऽखिलं दारु क्रीतं तेभ्यो दिनत्रयम् अकस्मादथ संजाते काष्ठच्छेदेऽतिवृष्टिभिः मया तद्दा
रु विक्रीतं पणानां बहुभिः शतैः तथैव विपणिं कृत्वा धनेन निजकौशलात् कुर्वन्वाणिज्यं क्रमशः संपन्नोऽस्मि महाधनः सौवर्णो मूषकः कृत्वा स च तस्मै म

क॰ स॰ १ यार्थितः विशाखिलाय सोपि स्वां कन्यामप्रमदात्ततः अत एव च लोकेहं प्रसिद्धो मोषकाख्यया एवं लक्ष्मीयं प्राप्ता निर्धनेन सता मया तच्छ्रुत्वा तत्र ते भूव
१४ वणिजो मीस विस्मयाः श्रीर्न चित्रा पतेकस्मादभिन्नो चित्रकर्मणा क्वचित्स्वतिगृह प्राप्तहेममाषाष्टको द्विजः छद्मगः कश्चिद्दिमुक्तो विटप्रायेन केनचि
14 त् पोषाचतुरिकानामवेश्या तस्या गृहं व्रज जत्र किं करवाणीति द्विजेनोक्तो विटोब्रवीत् स्वर्णं दत्त्वाप्य पुंजोषा रजयन्तामकिंचन श्रुत्वेस गच्छं छंदगो
ह तं चतुरिकागृहम् उपाविशत्स विश्वाय कृतप सुहृति त्तया मामयचलोकपाज्ञां त्वशिकृपेतेन साधनम् इति जल्पन्सतत्तस्याः स्वर्णमर्पितवान्
द्विजः प्रहसत्सथन्तत्रस्थे जने किंचिद्धि विंस सः गोवर्णं स दशोक्त्वा करावावद्धसार रंगोतारस्वरेतत्कामेम गायति सम जडाशयः यथा तत्र मिलं विस्म विटाह्
स्मदिदं द्विवः ते चावोचन्स्रगालायं प्रविष्टोत्र कुतोन्यथा तच्छीघ्रमर्धचंद्रोस्य मे गलेस्मिन्दीयतामिति अर्धचंद्रं शरं मत्त्वा शिरश्छेदभयाद्रुतम् शिक्षितानो
क्या त्रेति गर्जन्स निरगान्ततः तस्मैक्वा शानतो गच्छं गेनापंप्रेषितोभवत् वृत्तांतं चावदत्तस्य सोपि चैनमभाषत साममंसां त्वमयोक्तं नेवदस्यावसरो त्र कः किं वा
धुराधिरूढं द्विजायं वेदजडे जने एवं विहस्य गत्वा चैनेनोक्ता सा विलासिनी द्विपदस्य पशोरस्य तत्स्वर्णं त्यजाह्रि इसं सा वत्तयात्यक्तं सुवर्णं प्राप्य स द्विजः पु
नर्जातमिवात्मानं मत्त्वा तो गृहमागमत् एवं प्रायान हं पश्यन्कौतुकानि पदे पदे प्राप्तवान्राजसदनं महेंद्रसदनोपमम् ततश्चांतः प्रविश्याहं शिष्यैरग्रे निवेदितः
आस्थानस्थितमद्राक्षं राजानं सातवाहनम् शर्ववर्मप्रभृतिभिः मात्राभिः परिवारितम् रत्नसिंहासनासीनममरैरिव वासवम् विहितस्वस्तिकारं मां गु
पविश्य मयासने राज्ञा कृतादरे चैव शर्ववर्मा दिशोत्कवन् अयं देव भुवि ख्यातः सर्वविद्याविचक्षणः गुणाढ्य इति नामास्य यथार्थमत एव हि इत्यादि तत्कृतिं राम॰
दृष्ट्वा मंत्रिभिः सातवाहनः प्रीतस्तत्क्षणं समं विलेमां न्ययोजयत् अथाहं राजकार्याणि चिंतयन्नवसं सुखम् शिष्यान्ध्यापयंस्तत्र कृतदारपरिग्रहः १४

© Dharmartha Trust J&K. Digitized by eGangotri

कदाचित्कौतुकाक्रान्तस्वैरं गोदावरीतटे देवीकृतिरिति ख्यातमुद्यानं दृष्टवानहम् तत्रातिरम्यमालोक्य हि तिष्ठन्निव नंदनम् उद्यानपालः पृष्टो ऽभून्मया
तत्र तदागमम् स च मामवदत्स्वामिन्पूर्वमस्य अपतेया या गर्वमौमी निराहारो द्विजः कश्चित्सम्मायंयो मदिदमिदमुद्यानं सदेवभवनमधात् ततो ब्राह्म
णाः सर्वमिलन्तिमस्तकौतुकाः निवाधान्तेः सषष्टः स्ववृत्तान्तमवदद्द्विजः अस्तीह वककच्छाख्या विषये नर्मदातटे तस्मिन्नहं समुत्पन्नो विप्रस्तस्य च मे पुरा न
भिक्षामप्यदात्कश्चिद्दरिद्रस्यालसस्य च अथ स्वेदादहं सक्त्या विरक्तो जीवितं प्रति भ्रान्त्वा तीर्थान्यहं दुर्गमगच्छं विन्ध्यवासिनीम् दृष्ट्वा ततश्च तां देवीमितिसं
चिंतितं मया लोकः पशूपहारेण प्रीणाति वरदामिमाम् अहं त्वात्मानमेवेह हन्मि मूर्खमिमं पशुम् निश्चित्येति शिरश्छेत्तुं मया शस्त्रमगृह्यत ततः कृपां सा
प्रसन्नां मे देवी स्वयमभाषत पुत्र सिद्धोसि मात्मानं वधीस्तिष्ठ ममान्तिके इति देवीवरं लब्ध्वा संप्राप्ता दिव्यता मया ततः प्रभृति नष्टा मे बुभुक्षा तृष्णया सह कदा
चिदथ देवी मां तत्रस्थं स्वयमादिशत् गत्वा पुत्र प्रतिष्ठाने रचयोद्यानमुत्तमम् इत्युक्त्वा सैव मे बीजं दिव्यं मादात्ततो मया इहागत्य कृतं कान्तमुद्यानं तत्प्रभाव
तः पाल्यमेतच्च युष्माकमित्युक्त्वा स तिरोदधे एवं निर्मितमुद्यानमिदं देव्या पुरा प्रभो उद्यानपालादित्येवमुद्देशे देव्यनुग्रहम् आकर्ण्य विस्मयात्स्वगृहाया
गतवानहम् एवमुक्ते गुणाढ्येन काणभूतिरभाषत सातवाहनशब्दस्य कस्मान्नाम प्रभोरिति ततो ऽब्रवीद्गुणाढ्योपि शृणु सर्वं तत्कथयामि ते दीपकर्णिरि
ति ख्यातो राजाभूत्सत्त्वविक्रमः तस्य शक्तिमती नाम भार्या प्राणाधिका भवत् एकदा तस्य सुप्तामुद्याने सर्पस्तां जातु दृष्टवान् गतायामथ पंचत्वं तस्यां तद्गतमानसः अ
पुत्रोपि स जग्राह ब्रह्मचारिव्रतं नृपः ततः कदाचिद्राज्यार्हपुत्राभावदुःखितम् इत्यादिदेश तं स्वप्ने भगवानिंदुशेखरः अटव्यां दृष्टसिंहास्थं सिंहारूढं कुमा
रकम् तं गृहीत्वा गृहं गच्छेः स ते पुत्रो भविष्यति अथ प्रबुद्धस्तं स्वप्नं स्मरन्राजा जहर्ष सः कदाचित्स ययौ दूरादटवीं मृगयारसात् ददर्श तत्र मध्याह्ने सिंहं।

© Dharmartha Trust J&K. Digitized by eGangotri

हं०के०१
१५
15

नृदंतं भूपतिः बालकं प्रमररमत्तीरे तपनतेजसम् अथराजास्मरत्स्वप्नमवतारितबालुकम् जलाभिलाषिणां सिंहं जघानैकशरेणतम् सहिंस्त्रंतद्वसुस्स
क्तासयोभूत्सुरुषाकृतिः कस्त्वं किमेतद्ब्रूहीतिराज्ञा पृष्टोजगादच धनदस्यसखायक्षः सातोनाम्नास्मि भूपते सोहंस्वांतामपश्यंप्रागगायाम्दृषिकन्यकाम्
सापि मांवीक्ष्यसंजातमन्मथाभूदृढंयथा गांधर्वेणविवाहेन ततोमायाप्रहितामया तच्चतद्बांधवावृद्धा तांचमांवाशायक्रुधा सिंहोभविष्यतःपापोस्त्रे
च्छाचारोयुवामितिपुत्रजन्मावधिंतस्याः शापांतेमुनयोअधुःममतुत्वच्छराघातपर्यंततदनंतरम् अथावांसिंहमिथुनंसंजातौतासापिकाननतःगर्भि
णपभूत्ततोजातेस्यारकेस्मिअपघत अर्पचबुधितोऽन्यासांसिंहानांपयसामया अथचाहंविमुक्तोस्मिशापाद्बाणाहतस्त्वया तद्गृहाणमहासत्वंम
याद्भमसेमुंनम् अयंस्वर्पःसमादिष्टस्तेरेवमुनिभिःपुरा त्वसुक्रांतहितेतस्मिन्मानानामनिगुस्वकेसराजातंसमादापवालंप्रसायथोगृहम् सोते
नयस्मादृहोषन्नस्मान्नंमातहेनम् नाम्नानाचकारकालेनराज्येचैनंन्यवेशयत् ततस्तस्मिनातेरापद्वीपकरोस्तितीश्वरेमवृत्तःसार्वभौमोसौभूप
तिःसोहंनवीनःएवमुक्त्वाकथांमध्येकाणभूसनुयोगतःपुणाग्रःप्राहृतंधीमाननुसूयसावबवीसुनःततःकदाचिद्ध्यास्तवसंतसमयोत्सवे देवोह
तेनदुद्यानेसराज्ञासातवाहनःविहरन्सचिरंतत्रमहेंद्रइवनंदने वापीजलेवतीर्णोभृत्क्रीडितुंकामिनीसखःअसिंचन्तत्रदयिताःसहेलंकरवारिभिःअसि
अततताभिश्चवशाभिरिववारणःमुखैर्धौतांजनाताम्रैर्नेत्रैर्जहृजलप्लुतैःअंगैःसक्तांबरैर्व्यक्तविभागैश्चनमंगनःविचलत्सचलतिकाःसवक्रैवनम
ध्यगाःच्युताभरणपुष्पासालताबाधुरिवप्रियाः अथैकातस्यमहिषीराज्ञस्तनभरालसा शिरीषसुकुमारांगीक्रीडंतीक्लममागमत् साजलैरभिषिंचंतं राम
राजानंमसहासती अब्रवीन्मोदकैर्देवपरिताडयमामिति तच्छ्रुत्वामोदकानाजाडुतमानाययत्तदा ततोविहस्यसाराज्ञीपुनरेवमभाषत राजन्नवसरः १५

© Dharmartha Trust J&K. Digitized by eGangotri

कोत्र मोदकानां जलांतरे उदकैः सिंच मा त्वं मामित्युक्ते हि मया न वेत्सि संधिमात्रं न जानासि माशब्दोदकशब्दयोः न च प्रकरणं वेत्सि मूर्खस्त्वं कथ
मीदृशः इत्युक्तः स तया राजा स शब्दशास्त्रविद्वानप्यन्तः परिवारे हसंत्यां लज्जाक्रांतो झगित्यभूत् परित्यक्तजलक्रीडो वीतदर्पश्च तत्क्षणात् जाता
वमानो निर्लज्जः प्राविशन्निजमंदिरम् ततश्चिंतापरो मुह्यन्नाहारादिपराङ्मुखः चित्रस्थ इव पृष्टोऽपि नैव किंचिदभाषत पांडित्यं शरणं वा मे मृत्यु
र्वेति विचिंतयन् शयनीये परित्यक्तगात्रः संतापवानभूत् अकस्मादथ राज्ञस्तां दृष्ट्वावस्थां तथाविधां किमेतदिति संभ्रांतः सर्वः परिजनोऽभवत्
ततोऽहं सर्ववर्मा च ज्ञातवंतौ क्रमेण ताम् अत्रांतरे स च प्रायः पर्यहीयत वासरः अस्मिन्कालेन च स्वस्थो राज्ये मालोच्य तन्न गात् आवाभ्यां रा
जहंसास्य भ्रातृतो राजचेटकः शरिवाज्ञो भूयस्मसच पृष्टोऽब्रवीदिदम् नेदृशो दुर्मना देवो दृष्टः पूर्वं कदाचन विष्णुशक्तिदुहित्रा यद्देव्या पंडितया
तया विलासीकृतः साहुर्देव्योऽन्याः कोपनिर्भरम् एतत्तस्य मुखाच्छ्रुत्वा राजचेटस्य दुर्मनाः शर्ववर्मद्वितीयोऽहं संशयादिति चिंतये आधिर्यदि
भवेद्राज्ञः प्रविशेरंश्चिकित्सकाः आधिर्वा यदि तत्रास्य कारणं नोपलभ्यते नास्त्येव हि विपक्षोऽस्य राज्ये निहतकंटके अनुरक्ताः प्रजाश्चैता न हा
निः परिदृश्यते तत्कस्मादेष स्वेदः स्यादीदृशः सहसा प्रभोः एवं विचिंतिते धीमान् शर्ववर्मेदमब्रवीत् अहं जानामि राज्ञोऽस्य मन्युर्मौर्ख्यानुताप
तः मूर्खोऽपमतिपांडित्यं सचैवापं हि वांछति उपलब्धो मया चैष पूर्वमेव तदाशयः राज्ञ्यावमानितश्चाद्य तन्निमित्तमिति श्रुतम् एवमन्योन्यमालोच्य तां रा
त्रिमतिवाह्य च प्रातरावामगच्छाव वासवेश्म महीपतेः तत्र सर्वस्य रुद्धेऽपि प्रवेशे कथमप्यहम् प्राविशं मे स पश्चाच्च शर्ववर्मा लघुक्रमम् उपविश्याथ निक
टे विज्ञप्तः स मया नृपः अकारणं कथं देव वर्त्तसे विमना इति तच्छ्रुत्वापि तथैवासीत्तत्र स्कंधिः सातवाहनः शर्ववर्मा ततश्चेदमद्भुतं वाक्यमब्रवीत् श्रुतं मम

© Dharmartha Trust J&K. Digitized by eGangotri

कु.सं.२ स्याह्लापीतिमांगुरुंदेवमेत्यया तेनाहंस्नानवातप्रस्तम्भमाणवकं निशिस्वप्नेततोमयादृष्टंनभसश्च्युतंपद्मजम् तच्चदिव्येनकेनापिकुमारे
१६ णाविकासितम् ततश्चनिर्गतातस्माद्दिव्यास्त्रीधवलाम्बरा तत्रदेवमुखेसाचप्रविष्टासमनन्तरम् इयद्दृष्ट्वाप्रबुद्धोस्मिसाचमन्येसरस्वती
16 देवस्यवदनेसासाक्षात्प्रविष्टानसंशयः एवं निवेदितस्वप्नेशर्ववर्मणितत्क्षणम् मामुक्तमौनःसाकूतमवदत्सातवाहनःशिक्षमाणःप्रय
त्नेनकालेनकियतापुमान् अधिगच्छतिपांडित्यमेतन्मेकथ्यतांत्वया ममतेनविनास्वेषालक्ष्मीनाप्रतिभातिमे विभवैःकिंनुमूर्खस्यका
ष्ठस्यभरणैरिव ततोहमवदंराजन्वर्षैर्द्वादशभिःसदा ज्ञायतेसर्वविद्यानांमुखंव्याकरणंनरैः अहंतुशिक्षयामित्वांवर्षषट्केनतत्प्रभो श्रुत्वैत
त्सहसासूयंशर्ववर्माकिलाब्रवीत् सुखोचितोजनःक्लेशंकथंकुर्यादियच्चिरम् तदहंमासषट्केनदेवत्वांशिक्षयामितत् श्रुत्वैतदसं
भाव्यंतमवोचमहंरुषाषड्भिर्मासैस्त्वयादेवःशिक्षितश्चेत्ततोमयासंस्कृतंप्राकृतंतद्वद्देशभाषाचसर्वदा भाषात्रयमिदंत्यक्तं यन्मनुष्ये
षुसंभवेत् शर्ववर्माततोवादीन्नचेदेवंकरोम्यहम् द्वादशाब्दान्वहाम्येषशिरसातवपादुके इत्युक्त्वानिर्गतेतस्मिन्नहमप्यगमंगृहम् रा
जाप्युभयतःसिद्धिंमत्वास्वस्थोऽभवत्सः शर्ववर्माचवाहस्तःप्रतिज्ञांतांसुदुस्तराम् पश्यन्सानुशयःसर्वंस्वभार्यायैशशंसतत् सापितंदुःखि
तावाचत्संकटेस्मिंस्तवप्रभो विनास्वामिकुमारेणगतिरन्यानदृश्यते तथेतिनिश्चयंकृत्वापश्चिमेप्रहरेनिशिशर्ववर्मानिराहारस्तत्रैवस
प्रस्थितोभवत् तच्चचारमुखाद्बुद्ध्वाममप्रातर्निवेदितम्राज्ञेसोपितदाकर्ण्यकिंभवेदित्यचिन्तयत् ततःसोसिंहगुप्ताख्योराजपुत्रोहितो राम
ब्रवीत् त्वयिखिन्नेनराजदेवनिर्वेदोमेमहानभूत् ततःश्रेयोनिमित्तंतेचण्डिकाग्रेनिजंशिरः सम्मुञ्जारप्रवानस्मिगत्वास्मान्नगराद्बहिःमवंग्लृया १६

© Dharmartha Trust J&K. Digitized by eGangotri

नृपस्येह्यासनेतस्य सेवेस्सवारयत् वागंतरिक्षादथमांतम्भमेसिद्धिरस्ति ते इत्युक्त्वा नृपमामंत्र्य अनन्तवंशवर्म्मणः पश्चाद्वारद्वयंसोऽसिंहगुप्ते
अमर्जयत् सोपिवानैकभस्यः मन्नकृतमौनः सुनिश्चयः प्राप स्वामिकुमारस्य शर्ववर्मा तिकंक्रमात् शरीरनिरपेक्षेणतपसातत्रतोषितः
प्रसादमकरोत्तस्य कार्त्तिकेयो यथेप्सितम् आगसाग्रततोराज्ञेचाराभ्यांसनिवेदितः सिंहगुप्तनिरस्त्राभ्यामुद्यः शर्ववर्म्मणः तद्बुद्ध्वासमरा
जश्च विषादस्य मदोहृपः अभूत्तांमेघमालोक्वाहंसवातकयोरिव आगतःशर्ववर्मा च कुमारवरसिद्धिमान् चितितोपस्थित राज्ञे सर्वा विद्याः धा
प्रदत्तवान् प्रादुरासंस्तथा तस्य सातवाहनभूपतेः तत्क्षणाकिंनकुर्याद्धि प्रसादः पारमेश्वरः अथ तमखिलविद्यालाभमाकर्ण्य राज्ञः प्रमुदि
तवतिराष्ट्रेतत्रकोप्युत्सवोभूत् अपि पवनविधूतास्तत्क्षणाद्धास्यमानाः प्रतिवसतिपताकावद्धुत्सवास्तदाभम् राजाहीरलनिचयैर
यशर्ववर्मा तेनार्चितोगुरुरितिप्रणतेनराज्ञा स्वामीकृतश्च विषये तत्क्रच्छनाम्नि कूलोपकंठविनिवेशिनिनर्मदायाः योयेचारसुखेनघरणु
स्ववरमप्राप्तिसमाकर्ण्य संतुष्यात्मसमंप्रियात्तरपत्तिसिंहगुप्तं व्यधात् राज्ञीतामपिविस्मृशक्तितनयांविद्यागमेकारणं देवीनामुप
रिप्रयुत्कृतवान्सीसामिषिच्य तत्वयम् इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे कथापीठलंबके षष्ठस्तरंगः ज ततोगृहीतमौनोहंराजा
तिकमुपागमम् तत्र च स्नाकमपदद्विजः कश्चित्स्वयंकृतम् तं चाचष्टस्वयंराजानामंकोस्तुसमपागिरा नदाल्लोकश्चवतत्रस्थोजनःप्रमुदि
तोभवत् ततः सशर्ववर्माणंराजामांविनयोऽब्रवीत् स्वयंकथयदेवेनकथंतेनुग्रहः कृतः तच्छ्रुत्वातदनुग्रहंराज्ञः शर्ववर्माभ्यभाषत श्रूतोराजन्नि
राहारोमौनस्थोहंतदागतः ततोध्वनिमनाक्क्लेशेजातेतीव्रतपःकृशः क्लान्तःपतितवानस्मि निःसंज्ञोधरणीतले उत्तिष्ठपुत्रसर्वंतेसंपत्स्य

© Dharmartha Trust J&K. Digitized by eGangotri

क.स.
१७
17

नदीति स्फुरम् शक्तिहीनस्ततः पुमानेष जानेमामब्रवीन्न शाने नाहमेतत्ता सा रसं सिक्तइ एव नन्तस्य राणाम् प्रबुद्धः सुप्तिपासादिहीनः स्वस्थ एवाभवम् अथ
देवस्य निकटं प्राप भक्तिभराकुलः स्वात्मत्यागभये गृहं तत्र मे विस्तोभ्यैवमुन्मनाः तत्रांतः प्रभुणा तेन स्कंदेन मद्दर्शनम् दत्तं ततः प्रविश्य मे मुखे वं जा सरस्वती
अथासौ भगवान्साक्षात्षडिराननपंकजैः ॐ सिद्धो वर्णसमाम्नाय इति सूत्रमुदीरयत् तच्छ्रुत्वैव मनुष्यत्वसुलभाच्चापलाद्धतं उत्तरं सूत्रमभ्यूह्य स्वयमेव
मयोदितम् अथाब्रवीत्स देवो मां नावदिष्यः स्वयं यदि अभविष्यदिदं शास्त्रं पाणिनीयोपमर्दकम् अधुना स्वल्पतंत्रत्वात्कातंत्राख्यं भविष्यति मद्वा
हनकलापस्य नाम्ना कालापकं तथा इत्युक्त्वा शब्दशास्त्रं तत्प्रकाश्याभिनवं लघु साक्षादेव स मां देवः पुनरेवमभाषत युष्मदीयः स राजापि पूर्वजन्मन्यभू
दृषिः भारद्वाजमुनेः शिष्यः कृष्णसंज्ञो महातपाः तुल्याभिलाषामालोक्य स चैकां मुनिकन्यकां ययावकस्मात्पुष्पेषुशराघातरसज्ञताम् अतः सश म
प्तो मुनिभिस्त्ववतीर्णो इहाद्भुता सा चावतीर्णा देवीत्वेतस्यैव मुनिकन्यका इत्थमृष्यवतारोऽयं नृपतिः सातवाहनः दृष्टे त्वय्यखिला विद्याः आप्स्यते त्वरि
तच्छया अहो शलभ्यापि हि वस्तु नाम महात्मनां जन्मांतरार्जितस्फारसंस्काराश्रितसिद्धयः इत्युक्त्वांतर्हिते देवे निरगच्छमहं बहिः तंडुला मह्यं तत्र
देवोपजीविभिः ततोहमागमं राजंस्तंडुलांस्तु च मे पथि विचित्रं तावदेवासन्भुज्यमाना दिने दिने एवमुक्त्वा स्ववृत्तांतं विरते शर्ववर्मणि उदतिष्ठत्स्वयः
स्नातुं प्रहृष्टः सातवाहनः ततोहं कृतमौनत्वाद्व्यवहारबहिष्कृतः अनिच्छंतं तमामंत्र्य प्रणम्यैनं च भूपतिम् निर्गत्य नगरात्तस्माच्छिष्यद्वयसमन्वितः तपसे
निश्चितो द्रष्टुमागजो विंध्यवासिनीम् स्वप्नादेशेन देव्या च तयैव प्रेषितस्ततः विंध्याटवीं प्रविष्टोहं तां द्रष्टुं भीषणामिमां पुलिन्दवाक्यादाक्षायणस्ताय दे राम.
वात्कथंचन इह यातोहमद्राक्षं पिशाचान्सुबहूनमून् अन्योन्यालापमेतेषां दूरादाकर्ण्य शिक्षिता मयापि पैशाचभाषेयं मौनमोक्षस्य कारणम् उपा १७

© Dharmartha Trust J&K. Digitized by eGangotri

गम्य ततस्त्वेतां त्वां श्रुत्वोज्ज्वपिंगलागतम् प्रतिपालितवानस्मि यावद्द्यागतो भवान् दृष्ट्वा त्वां त्वागतं कृत्वा चतुर्थ्यां भूतये भो या मया जातिः स्मृते
सेषवृत्तांतो मेत्र जन्मनि एवमुक्ते गुणाढ्येन काणभूतिरुवाच तम् त्वदागमो मया ज्ञातो यथा च निशि तच्छृणु राक्षसो भूतिवर्माख्यो दिव्यदृष्टिः स
खास्ति मे गतवानस्मि सोद्यानमुज्जयिन्यां तदास्पदम् तत्रासौ निजशायां तं प्रति पृष्टो मयाब्रवीत् दिवा नास्ति प्रभावो नस्तिष्ठ रात्रौ वदाम्यतः तथे
ति चाहं तत्रस्थः प्राप्तायां निशि तद्भवाम् तम पृष्टं प्रसंगेन भूतानां हर्षकारणम् पुरा विरिंचिसंवादे यदुक्तं शंकरेण तत् शृणु वमीति मामुक्त्वा भूतिव
र्माप्यसोब्रवीत् दिवा तेषां प्रभावोस्ति ध्वस्तानामर्कतेजसा यक्षरक्षःपिशाचानां तेन हृष्यन्त्यमी निशि न पूज्यन्ते सुरा यत्र न च विप्रा यथोचितम् भुञ्जते
विधिनावापि तत्र ते प्रभवन्ति च अमांसभक्ष्याः साध्वी च यत्र तत्र न यान्त्यमी शुचीन्शूरान्प्रबुद्धांश्च नाक्रामन्ति कदाचन इत्युक्त्वा मयि तत्काले भूतिवर्मा
ब्रवीत्पुनः गच्छ आगतो गुणाढ्यस्ते शापमोक्षस्य कारणम् श्रुत्वैतदागतश्चास्मि त्वं चेदृश्ये मया प्रभो कथयाम्यधुना तां ते पुष्पदन्तोदितां कथाम् किं त्वेवं कौ
तुकमस्ति कथ्यतां केन हेतुना स पुष्पदन्तस्त्वं चापि माल्यवानिति विश्रुतः काणभूतेरिति श्रुत्वा गुणाढ्यस्तमभाषत गंगातीरे प्रहारोस्ति नाम्ना बहुसु
सुवर्णकः तत्र गोविंददत्ताख्यो ब्राह्मणोभवद्बहुश्रुतः तस्य भार्याग्निदत्ता च बभूव पतिदेवता स कालेन द्विजस्तस्यां पंच पुत्रानजीजनत् ते च मूर्खाः सुरूपा
श्च बभूवुरभिमानिनः अथ गोविंददत्तस्य गृहानतिथिरायया विप्रो वैश्वानरो नाम वैश्वानर इवापरः गोविंददत्ते तत्काले गृहादपि बहिः स्थिते तत्पुत्रा
णामुपागस्य कृतं तेनाभिवादनम् हासमात्रं च तैस्तस्य कृतं प्रसभिवादनम् ततः सकोपो निर्गन्तुं प्रारेभे जरद्दहा द्विजः आगतेनाथ गोविंददत्तेन स तथाविधः
क्रुद्धो रुष्टोनुनीतोपि जगादेवं द्विजोत्तमः पुत्रास्ते पतिता मूर्खास्तत्संपर्काद्भवानपि तस्मान्न भोक्ष्ये त्वद्गेहे प्रायश्चित्तं तु मे भवेत् अथ गोविंददत्तस्तमुवा

© Dharmartha Trust J&K. Digitized by eGangotri

बृ॰ के॰ १ वर्षापयोत्तरम् नस्य शाम्यपि जात्वेतानहं कुतनयानिति तद्भार्यापितथैवेस्मत मुवाचातिथिप्रिया ततः कथंचिद्दातिथ्यं तत्रैवेस्थानरोग्रहीत् त
१८ दृष्ट्वा देवदत्तोस्यमत्तस्मिन्कृतत्रपस्तदा अभूद्दाविंद्रदत्तस्यैव पुत्रयेनानुतापवान् अर्थजीवितमाल्लोक्य पितुस्थापमयद्वचितम् स निर्वेदः स तप
18 से ययौ बदरिकाश्रमे ततः पर्णाशनः पूर्वं धूमपश्चाप्यनंतरम् तस्थौ विरायत यस्तेनाबयियिष्यन्नुमापतिम् ददौ च दर्शनं तस्य शंभुस्तीव्रतपोर्जितः
तस्मै वानुचरत्वं च स ववे वरमीश्वरात् विद्याः प्राप्नुहि भोगांश्च भुवि भुक्त्वा ततस्तव भविताभिमतं सर्वमिति तं शंभुस्तमादिशत् ततः स गत्वा विद्यार्थी
पुरं पाटलिपुत्रकम् सिषेवे वेदकुंभारमुपाध्यायं यथाविधि तत्र स्थितं समुपाध्यायपत्नी जाता स्मरातुरा हठाद्बबे वतद्योण्णं चापलात्खिन्नहृदयः
तेन संसत्यत्तदेशमनगच्छत विघ्नवः स देवदत्तः प्रययौ प्रतिष्ठानमतं द्वितः तत्र वृद्धमुपाध्यायं वृद्धयार्यायान्वितम् मंत्रवाप्यादरमसम्यर्थ्य वि
द्याः सम्यगधीतवान् कृतविघ्नं च तं तत्र ददर्श नृपतेः सुता सुशर्माख्यस्य सुभगश्रीर्नाम श्रीरिवाच्युतम् सोपि तां दृष्टवान्कन्यां स्थितां वातायने
परि विहरंती विमानेन चंद्रस्येवाधिदेवताम् बद्धविवत्तयान्योन्यं मारस्त्रं खलयाद्दशा नायत्तं तु समर्थौ तौ बभूवतुरुभावपि साच तस्यैकदा
गुप्तामर्त्यं यथेवस्मात्तया ततो निकटमहीतिसंज्ञां चक्रे स्मरात्मजा ततः समीपमस्याश्च ययावेतः पुराश्रमः सा च विक्षेपदंतेन पुष्पमादायदंतेश
ति संज्ञामेतामजानानो गुरोराजसुताकृताम् स कन्दंस्याः अविमूढः सन्नुपाध्यायगृहं ययौ लुलोठ तत्र धरणौ न किंचिद्वक्तुमाश्वासः तापेन दह्यमा
नोंतर्मूकः समुपितो यथा वितर्कितकामजेष्ठिडैस्तयाध्यायेन धीमता पृष्टः कथंचिद्वयथावृत्तं शशंस सः तद्बुद्ध्वा योविदग्धो वाक्समब्रवीत् दं राम॰
तेन पुष्पं मुंचंत्या तया संज्ञा कृता तव पदे सुत पुष्पदंताख्यं पुष्पारव्यं सुरमंदिरम् तत्रागसमतीक्षेथाः सांप्रतं गम्यतामिति श्रुत्वेतिज्ञातसंज्ञार्थः स तसा १८

© Dharmartha Trust J&K. Digitized by eGangotri

जग्मुश्च युवा ततो देवगृहस्यांतस्तत्र स्थित्वागतोभवत् साप्यष्टमासमुद्दिश्य तत्र राजसुता ययौ एकैव देवं द्रष्टुं च गर्भागारमथाविशत् देवोपहार
पद्मस्य पश्चात्सोथ प्रियस्तया गृहीतानेन चास्यापमार्द्दं ठसहसा ततः चित्रकर्पत्वया ज्ञातानामासंज्ञे सुस्थितेनया उपायेनमे ज्ञातानमयेति जग
दस: मुंचमामविदग्धस्त्वमिति सुक्तस्तत्क्षणान्तक्रुधामंत्रभेदभयात्साथ राजकमात तोपययौ सोपिगत्वा विविक्तेतां दृष्ट्वा नष्टांस्मरन्प्रियाम् देव
दृष्ट्वोवियोगाग्निविगलज्जीवितोभवत् दृष्ट्वातं नारदः शंभुः प्राकश्यमनः कित्वा रिशत् गणोयं पंचशिखं नाम तस्याभीप्सितसिद्धये स चागत्य समा
श्वास्य तं स्त्रीवेशं मत्स्योगेन मनः श्रुकारयत्तथयं चाभूद्वृद्धब्राह्मणरूपधृक् ततस्तेन समं गत्वा तं सुशर्ममहीपतिम् जनकं सुहृदः शस्तस्याः स जगाद गणा
ग्रणीः पुत्रो मे प्रोषितः स्थापितमेवेषं प्रजास्मद्गृहम् जन्मेस्तुष्वेषं निक्षेपो राजन्संप्रतिरक्ष्यताम् तच्छ्रुत्वा शापभीतेन तेनारापसुशर्मणा स्व
कन्यांतःपुरे गुप्तेस्त्रीतिसस्थापितायुवा ततः पंचशिखेयाते स्वप्रियांतःपुरे वसन् स्त्रीवेशः स द्विजस्तस्या विश्रंमास्पदतां ययौ एकदा चोत्सु
कायै तोनेनात्मानं प्रकाश्यसा गुप्तं गांधर्वविधिना परिणीता न्वपात्मजा तस्यां च धृतगर्भायां तं द्विजं सगणो तमः स्मृतमात्रागतो रात्रौ ततो
नैव दृलक्षितम् ततस्तस्य समुत्सार्यपुनः स्त्रीवेशमाश्रुतम् प्रातः पंचशिखः सोभूत्सर्ववद्ब्राह्मणाकृतिः तेनैव सह गत्वा च सुशर्मनृपमभ्यगात्
अद्य प्राप्तो मया राजन्पुत्रस्तद्देहि मे स्नुषाम् ततः स राजा तां बुध्वा रात्रौ क्वापि पलायिताम् तच्छापभयसंभ्रांतो मं त्रिभ्य इदमब्रवीत् । न विप्रोप
द्रूपं कोपि देवो महांश्च नागतः एवं प्रायाभवंतीह वृत्तांताः सततं यतः तथा च पूर्वं राजाभूत्तपस्वी करुणामयः दाता धीरः शिबिर्नाम सर्वसत्त्वा
भयप्रदः तं वंचयितुमिंद्रोथ कृत्वा श्येनवपुः स्वयम् मायाकपोतवपुषं धर्ममन्वापतद्द्रुतम् कपोतः सभयो गत्वा शिवेरंकं समाविशत् मनुष्य

© Dharmartha Trust J&K. Digitized by eGangotri

वृ॰क॰२
१९
19

वाच श्येनोथ मत्तं राजानमब्रवीत् राजन् भक्ष्यमिदं मुंच कपोतं क्षुधितस्य मे अन्यथा मां मृतं विद्धि मृते धर्मस्ततो भवेत् ततः शिविस्तं वाचेनमेष
मे शरणागतः अत्याज्यस्तद्ददाम्यन्यत्मांसमेतत्समं तव श्येनो जगादयद्येवमात्मानं संप्रयच्छ मे तथेति तत्प्रहृष्टस्सन्स राजा प्रत्यपद्यत यथा यथा
च मांसं स्वमुत्कृत्यारोपयच्छ्रयः तथा तथा तुलायां स कपोतोभ्यधिको भवेत् ततः शरीरं सकलं तुलां राजाप्यरोपयत् साधु साधु समं त्वेतद्दिव्या वा
गुदभूत्ततः इंद्रधर्मावितस्त्यक्त्वा रूपं श्येनकपोतयोः तुष्टावक्षतदेहं तं राजानं चक्रतुश्शिविम् दत्वा चास्मै वरानन्यांस्तावंतर्धानमीयतुः एवं मामपि का
प्यथ देवाजिज्ञासुरागतः इत्युक्त्वा ससचिवान्स्वैरं ससुशर्म महीपतिः तमुवाच भयभ्रष्टो विप्ररूपं गणोत्तमम् अभयं देहि साधो वक्रघातेहारितानि
शि मापयेवगतात्कापिरक्षमाणाप्यहं निशम्य क्रुद्धात्तस्यपेवाद्य विप्ररूपो गणोवदत् तर्हि पुत्राय राजन्मे देहि स्वातनयामिति जनकृत्वा शाप
मीतेन राज्ञा तस्मै निजासुता सा रात्रा देवदत्ताय ततः पंचशिखोपायो देवदत्ते पिताभूय अकाशं प्राप्यव त्वभाम् जज्ञेनेनस्य पुत्रस्य श्वशुरस्य विभूतिषु
कालेन तस्य पुत्रं च देहित्रमभिषिच्य सः राज्ये मत्वाधरं नाम सुशर्मा शिश्रिये वनम् ततो दृष्ट्वा सुतैश्वर्यं कृतार्थः सततयोवनम् राजापुत्र्यानया साकं देव
दत्तोप्यशिश्रयत् तत्राराध्य पुनः शंभुं सत्याग मर्त्यकलेवरम् तत्प्रसादेन तस्यैव गणाभावमुपागतः प्रियादत्तोज्झितासुष्यात्तं त्तानं ज्ञातवामतः अतः
स पुष्पदंताख्यः संपन्नो गणतां सदि तज्जार्यो च सती हारी रिव्याजानाजयाभिधा इत्थं स पुष्पदंताख्यो मदाख्यामधुनाशृणु यः सगो विंददत्ताख्यो
देवदत्तपिता द्विजः तस्यैव सोमदत्ताख्यः पुत्रोहमभवं पुरा तेनैव मन्युनागत्वा तपश्चाहं हिमाचले अकार्षं बहुभिर्माल्यैः शंकरं नंदयन्सदा तथैव प्र
कटीभूतान्प्रसन्नादिंदुशेखरात् सत्कान्यभोगलिप्सेन तद्गणत्वमपावृतम् यत्स जितास्मि भवता स्वयमाहूतेन माल्येन दुर्गवनभूमिसमुद्भवेन त

राम
१९

© Dharmartha Trust J&K. Digitized by eGangotri

न्मास्यवानितिभविष्यसिमेगणस्त्वमित्यादिशयत विभुर्गिरिजायवोमाम् अयमर्त्यवपुर्विमुच्यपुराणांसह मानद्गुणानामहं प्रथमः इति धूर्जटिना
कृतं प्रमादादभिधानंममनाम्यवानितीदम् सोहंगतः पुनरिहायममुष्यभावंशापेनशैलदुहितुर्वतकाणभूते तन्मेकथाहरकृतांकथयाधुनात्वं
येनावयोर्भवतिशापदशोपशांतिः इति श्रीमत्सोमदेवविरचितेकथा सरित्सागरे कथापीठलंबके सप्तमस्तरंगः एवं गुणाढ्यवचसा सा चास्मत्क
थामयी स्वभाषयाकथादिव्याकथिताकाणभूतिना तथैवचगुणाढ्येनपैशाचीभाषयातयानिब द्धासप्तभिर्वर्षैर्ग्रंथलक्षाणिसप्तसा मैतांवि
द्याधराहार्षुरितितामात्मशोणितैः अटव्यांमश्यभावाच्च लिलेखसमहाकविः तथाचश्रोतुमायातैःसिद्धविद्याधरादिभिः निरंतरमभूत्तत्रसविता
नमिवांबरम् गुणाढ्येननिबद्धांचतांदृष्ट्वैवमहाकथाम् जगाममुक्तशापःसकाणभूतिर्निजांगतिम् पिशाचायेपितत्रासन्नन्येतत्सहचारिणः
तेपिप्रापुर्दिवंसर्वेदिव्यामाकर्ण्यतांकथाम् प्रतिष्ठांप्रापणीयेयंपृथिव्यांमेबृहत्कथा अयमर्थोपिमेदेव्याशापांतोक्तावुदीरितः तत्कथंप्रापया
म्येनांकस्मैतावत्समर्पये इतिचाचिंतयत्तत्रसगुणाढ्योमहाकविः अथैकोगुणदेवाख्योनंदिदेवाभिधःपरः तमूचतुस्तपाध्यायंशिष्यावनुगतौ
तुभौ तत्काव्यस्यार्पणस्थानमेकःश्रीसातवाहनः रसिकोहिवहेत्काव्यंपुष्पामोदमिवानिलः एवमस्त्वितितौशिष्यौवंतिकंतस्यभूपतेः प्राहिणोत्सु
त्तकंदत्वागुणाढ्योगुणशालिनौ स्वयंचगत्वातत्रैवप्रतिष्ठानेपुराद्बहिः कृतसंकेतमुद्यानेतस्थौदेवीविनिर्मिते तच्छिष्याभ्यांसदत्वातत्सातवाहन
भूपतेः गुणाढ्यकृतिरेषेतिदर्शितंकाव्यपुस्तकम् पिशाचभाषांतांश्रुत्वातौचदृष्ट्वातदाकृती विद्यामदेनसासूयंसराजैवमभाषत प्रमाणंस
प्तलक्षाणिपैशाचंनीरसंवचः शोणितेनाक्षरन्यासोधिक्पिशाचकथामिमाम् ततःपुस्तकमादायगत्वाताभ्यांयथागतम् शिष्याभ्यांतद्गुणाढ्याय

© Dharmartha Trust J&K. Digitized by eGangotri

कृ॰ लं॰ १
४०
20

प्याहृतमकथ्यत गुणाढ्योपि तदाकर्ण्य सद्यः खेदवशोऽभवत् तत्रान्तेन कृतावज्ञः कोनामान्तर्न तप्यते सशिष्यश्च ततो गत्वा नातिदूरं शिलोच्चयम् विवि
क्तरम्यभूभागमग्निकुण्डं व्यधात्पुरः तत्राग्नौ पत्रमेकैकं शिष्याभ्यां सास्रु वीक्षितः वाचयित्वा स चिक्षेप श्रावयन्मृगपक्षिणः नरवाहनदत्तस्य चरितं शिष्ययो
र्कृते ग्रन्थं लक्षं कथामेकां वर्जयित्वा तदीप्सिताम् तस्मिंश्च तां कथां दिव्यां पठत्यपि दहत्यपि परित्यक्ततृणाहाराः शृण्वन्तः साश्रुलोचनाः आसन् समेत्य तत्र
ैव निश्चलबद्धमण्डलाः निखिलाः खलु सारङ्गवराहमहिषादयः अत्रान्तरे स राजाभूदस्वस्थः सातवाहनः दोषं चास्यावदद्वैद्यः शुष्कमांसोपभोगजम् आ
क्षिप्तास्तन्निमित्तं च सूपकारा बभाषिरे अस्माकमीदृशं मांसं ददते लुब्धका इति पृष्टाश्च लुब्धकास्तत्र ऊचुर्नातिदूरे गिरावितः पठित्वा पत्रमेकैकं कोप्यग्नौ क्षिपति
द्विजः तत्समेत्य निराहाराः शृण्वन्ति प्राणिनोऽखिलाः नान्यतो यान्ति तेनैषां शुष्कं मांसमिदं क्षुधा इति व्याधवचः श्रुत्वा कृत्वा तानेव चाग्रतः स्वयं स कौतु
काद्राजा गुणाढ्यस्यान्तिकं ययौ ददर्श तं समासीनं जटाभिर्वनवासतः प्रशान्तशेषशान्तशेषशापाग्निधूमिकाभिरिवाचितः अथैनं प्रत्यभिज्ञाय सबा
ष्पमगमध्यगम् तमस्कृत्य च पृष्टं तं ज्ञातं तं महीपतिः सोपि स्वं पुष्पदन्तस्य राज्ञे शापादि चेष्टितम् ज्ञानी कथावतारं तमाचख्यौ भूतभाषया ततो ग
णावतारं तं मत्वा पादानतो नृपः ययाचे तां कथां तस्माद्दिव्यां हरमुखोद्गताम् अथोवाच स तं भूपं गुणाढ्यः सातवाहनम् राजन्षड्गुपलक्षाणि मया दग्धा
नि षट् कथाः लक्षमेकमिदं त्वस्ति सैषैका सैव गृह्यताम् मच्छिष्यौ तव चात्रैतौ आख्यातारौ भविष्यतः इत्युक्त्वा नृपमामन्त्र्य त्यक्त्वा योगेन तां तनुम् गुणा
ढ्यः शापनिर्मुक्तः प्राप्यदिव्यं निजं पदम् अथ तां गुणाढ्यदत्तामादाय कथां बृहत्कथानाम्नी नृपतिरगान्निजनगरं नरवाहनदत्तचरितमयीम् गुणाढ्य राम॰ ४०
देवनन्दिदेवौ तत्र च तौ तत्कथाकवेः शिष्यौ क्षितिकनकवस्त्रवाहनभवनधनैः संवर्धयेन सः ताभ्यां सह तत्कथां तामाश्वास्य सातवाहनस्तस्यां तद्भाषया आ

© Dharmartha Trust J&K. Digitized by eGangotri

ह॰ लं॰ १ रंलकुचक्रेकृपाटम् साच चित्ररसनिर्भरा कथाविस्मृतामरकथाकुतूहलात् तद्विधाय नगरं निरंतरं ख्यातिमत्र भुवनत्रयो गता इति श्रीभट्टसोमदेवविर
२१ चिते कथासरित्सागरे कथापीठलंबके सप्तमस्तरंगः समाप्तश्चायं कथापीठलंबकः प्रथमः अतः परं कथामुखलंबको भविष्यति इदं गुरुगिरीन्द्रजाप्रणयमं
दरांदोलना सुरा किल कथामृतं हरमुखांबुधेरुद्धृतम् प्रसह्य रसयंति ये विगतविघ्नलब्धर्द्धयो धुरं दधति वैबुधीं भुवि भवप्रसादेन ते

९१

राम॰
२१

© Dharmartha Trust J&K. Digitized by eGangotri

प्रथमलंबकपत्र २१

१७५

© Dharmartha Trust J&K. Digitized by eGangotri